# प्रथमं प्रकरणम्

### ।। जैमिनिसूत्रमेकमध्ययनम् ।।

जैमिनि महर्षिणां चर्चा प्राय: सर्वेषु शास्त्रेषु दृश्यते । न्यायमीमांसापेक्षया ज्यौतिषशास्त्रे महत्त्वपूर्णमाधिपत्यम् प्राप्तं जैमिनि महर्षिणा। तेन,ज्यौतिषशास्त्र सूत्रे निबध्य तन्नाम 'जैमिनिसूत्रम्' वा 'जैमिनीयसूत्राणि' वा जैमिनि पद्यामृतं वा 'जैमिनीय पद्धति:' इति भिन्न भिन्न टीकायां विविधानि नामानि प्रदत्तानि । जैमिनिसूत्रे प्रथमाध्यायादारभ्य चतुर्थाध्याय पर्यन्तं त्रिस्कन्धज्यौतिषशास्त्र सारांशरूप होरा- ज्यौतिष विषयकानि सूत्राणि उपनिबद्धानि सन्ति । तत्र चत्वार: अध्याया: सन्ति, तत्र प्रत्येकध्याये चत्वारो पादा सन्ति ।

प्रथमाध्याये प्रथमपादे प्रथमसूत्रादामारभ्य पंचत्रिंशत्(३५) सूत्राणि वर्तते । प्रथमसूत्रे निर्विघ्नग्रन्थ समाप्त्यर्थं वस्तुनिर्देशात्मकं विविधार्थं सहितं मंगलमाचरति । २-३ सूत्रे राशि दृष्टि विचार:, ग्रहदृष्टि विचारश्च, ४-सूत्रे अर्गला योग:, ५- ग्रहकृतार्गलायोग:, ६- अर्गला बाधक योग:, ७-बाधक भाव योग:, ८- अर्गलायोगस्तत्प्रतिबन्धकश्च, ९- राहुकेत्वोरर्गलायोगस्तद्बाधकश्च,१०,११,१२, १३,१४,१५,१६,१७,१८-कारक विचार:, १९- पुत्रकारक विकल्पम्, २०-स्थिरकारक विचारे भगिन्यादि कारका:, २१- मातुलादिकारका:, २२- पितामहादिकारका:, २३- पत्न्यादिकारका:, २४- ग्रहाणां नैसर्गिक बलविचार:, २५,२६,२७-सामान्येन चरदशायां वर्षगणनाक्रम:, २८- चरदशावर्षज्ञान प्रकार:, २९- चरान्तर्दशा विचार:, ३०,३१,३२-राश्यादीनां पदस्थान विचार:, ३३,३४- भावादीनां संख्याबोधक विधि:

अर्थात् कटपयादि अंक ज्ञानम् तथा वर्णदाराशिदशा, ३५- होरादि ज्ञानम् निरूपणमस्ति ।

प्रथमाध्याये द्वितीयपादे  प्रथम सूत्रे आत्माकारकनवांश वैशिष्ट्यम्, २-३-४-५-६-७- आत्माकारकनवांश राशिफलम्, ८, ९, १०, ११, १२, १३-तुलांशकादिफलम्, १४, १५, १६, १७, १८, १९, २०, २१, २२- आत्माकारकांशस्थ ग्रहफलानि, २३, २४, २५, २६, २७, २८- शुभग्रहादि दृष्ट-युत राहु सूर्य फलम् ।, २९, ३०, ३१ आत्मकारकांशस्थित गुलिकफलम्, ३२, ३३, ३४, ३५, ३६, ३७- ग्रहदृष्टिवशादात्मकारकांशगत केतु फलम्, ३८- रवि शुक्र दृष्ट कारकांशफलम्, ३९-४०, ४१-कारकांशाद् दशमभावफलम्, ४२, ४३, ४४, ४५, ४६, ४७,- कारकांशाद् चतुर्थभावफलम्, ४८, ४९, ५०, ५१ आत्माकारकांशाद धर्मभावस्थफलम्, ५२, ५३, ५४, ५५, ५६ पारदारिकादि योगाः, ५७, ५८, ५९, ६०, ६१, ६२- आत्माकारकांशात् सप्तम भाव फलम्, ६३- विशिष्ट फलम्, ६६-६७ कर्षक योगः, ६८, ६९, ७०, ७१- आत्माकारकांशाद् द्वादशभावस्थग्रह फलम्, ७२, ७३, ७४, ७५, ७६, ७७, ७८, ७९, ८०, ८१-दैव भक्तिज्ञापक योगाः, ८२- विशेष योग, ८३, ८४, ८५-मान्त्रिकादि योगाः, ८६-८७ रसवादिभिषग् योगौ, ८८, ८९, ९०- कुष्ठादिरोग योगाः, ९१, ९२, ९३, ९४, ९५-क्षयरोगादियोगाः, ९६, ९७, ९८, ९९, १००, १०१- धानुष्कादि योगाः, १०२, १०३, १०४-आत्माकारकांशातत्पंचमस्थान व्यवशाद् ग्रन्थकृदयोगाः, १०५, १०६, १०७, १०८, १०९, ११०, १११, ११२, ११३, ११४, ११५- काव्यसत्वादि योगाः, ११६, ११७- विशेषविचार स्थानम्, ११८-स्तब्धवाग्योगः, ११९, १२०-कैमद्रुमयोगः, १२१-शुभाशुभ-कालः इत्यादिना निरूपणं उपलभ्यते ।

प्रथमाध्याये तृतीयपादे :- १- पदमवलम्ब्य फलं वाच्यं, २- श्रीमदादियोगाः,

३,४,५- धनलाभ योगाः, ६,७,८,९,१०,११,१२- व्ययाधिक्य योगाः, १३-उदर-रोगः, १४- वार्धक्यचिह्न योगः, १५,१६-द्वितीय स्थानस्थ ग्रह्योगवशाद् श्रीमद्योगः, १७-फलादेशे विशेषविचारः, १८,१९- धनहीनयोगः, २०,२१- मित्रता-शत्रुता योग, २२-भाग्यवान् योग, २३- धनसमृद्धि योगः, २४,२५,२६,२७ राजयोगाः, २८- वाहन-योगः, २९- वितानादि(राजचिन्ह) योगः, ३०,३१,३२,३३,३४-(अन्य) राजयोगाः, ३५-३६- राजपुरुष योगः, ३७, बुद्धि मन्त योगः, ३८-दरिद्र योगः, ४०- व्ययशील-योगः, ४१- बलवान् योगः, ४२,४३- बन्धन योगाः, ४४- नेत्रहानि योगः, ४५- राजचिन्ह योगः इत्यादि वर्णितमस्ति ।

प्रथमाध्याये चतुर्थपादे- १-उपपद निरूपणम्, २,३,४,५- प्रव्रज्यो-दारनाशयोगश्च वा, ६- बहुदारयोगः, ७- युग्मदार योगः, ८- निंदार योगः, ९-उच्चकुलोत्पन्ना-दारा, १०- नीचकुलोत्पन्ना दारा, ११- सुन्दरी योगः, १२- लोकापवादात् स्त्री त्यागः नाशः वा, १३- (विविध स्त्री रोग योगाः) रक्तप्रदर योगः, १६- स्थूलता, १७,१८- नासिका रोग, १९,२०- कर्णरोग, नाडिकानिः सरण रोग, तथा दन्तरोग, २१- पंगु । वात रोगश्च वा, २२- पूर्वोक्तरोगभंगयोगाः, २३- विशेषविचारः, २४- सन्तान रहित योगः, २५- बहुपुत्र योगः, २६- एकपुत्रयोगः, २७- विल बम्बात पुत्र योगः, २८- दत्तकपुत्र योगः, २९- बहुपुत्रयोगः, ३०- अल्प-प्रजायोगः, ३१- विशेष विचारः, ३२- भ्रातृनाशयोगः, ३३,३४- गर्भनाशयोगः, ३५- बहुभ्रातृयोगः, ३६- भ्रातृनाश योगः, ३७- भ्रातृसुखरहितः, ३८- भगिनीसंख्या योग, ३९- दंष्ट्रावान् योगः, ४०- स्तब्धवाक्, ४१- कुरुपयोगः, ४२- वर्णज्ञानम्, ४३- दैवताभक्ति विचारः, ४४- परजात योगः, ४५- परजातभंगयोगः, ४६-प्रसिद्ध परजात योगः, ४७- गुप्तपरजात योगः, ४८- लोकापवाद मात्र परजात योगः इत्यादि

इति निरूपणमस्ति । ४६-स्वकुल प्रधान योगः,।

द्वितीयाध्याये प्रथमपादे : १- आयुर्विचारः कर्तव्यः, २- दीर्घायु योगः, ३- मध्यायुर्योगः, ४- अल्पायुर्योगः, ५- आयुर्विचारे द्वितीयः प्रकारः, ६- आयुर्विचारे तृतीयः प्रकारः, ७,८,६- आयुर्विभेदे निर्णयः, १०,११,१२,१३- आयुर्योग स्वरूपाया कक्षायाचा ह्रासः, १४- गुरुग्रहकृतकक्ष्यावृद्धि योगः, १५- द्वार-बाह्यसंज्ञक राशि-नवांशदशा न्तर्दशा (वक्ष्यमाणलक्षणानुसारेण २ अ.४ पाद सूत्रे २-३ च), १६,१७,१८- निधनकाल निर्णयः, १६,२०- प्रकारान्तरेण दीर्घादित्रिविधायुर्योगाः, २१-राशिबल-विचारः, २२- विशेष योगः, २३,२४,२५- कक्ष्याह्रासयोगः, २६- कक्ष्यावृद्धि योगः, २७- गुरुवशकक्ष्याह्रासादिविचारः, २८,२६- तत्र विशेषः, ३०,३१,३२,३३,३४- स्थिरदशानुसारेण निधनज्ञानम्, ३५,३६,३७,३८,३६- रुद्रग्रहलक्षणानिरूपणपूर्वक-निधन योगः, ४०,४१- अत्र विशेषः, ४२,४३,४४,४५- अन्यनिधन योगाः, ४६,४७ ४८- महेश्वरग्रहनिर्णयः, ४६-ब्रह्मग्रह निरूपणम्, ५०,५१,५२,५३,५४- विशेष विचारः, ५५- आयुर्ज्ञानम्, ५६- निधनयोगः, ५७,५८- मारकग्रहनिरूपणम्, ५६,६०-मारकदशायां-निधनयोगः इत्यादि निरूपणमस्ति ।

द्वितीयाध्याये द्वितीय पादे- १,२,३- पितृमातृकारक विचारः, ४,५,६, ७,८- मातृपितृ-निधन योगाः, ६,१०-पत्नीप्रभृतीनां निधन योगः, अर्थात् भ्रातृपुत्रादिकारक ग्रह शूलदशायां मरणं ज्ञेयम्, ११,१२,१३- निधन स्थिति ज्ञानम् । १४,१५,१६,१७,१८,१६,२०,२१,२२,२३,२४,२५,२६,२७,२८- निधन निमित्तक-विविधयोगाः, २६,३०,३१- मातापित्रोः संस्कारस्याकर्तृत्व योगः इत्यादि निरूपणमस्ति ।

द्वितीयाध्याये तृतीय पादे- १,२- नवांशदशा विचारः, ३,४- स्थिरदशा-विचारः, ५,६,७,८,९,१०,११,१२,१३- प्रथमराशिबल विचारः, १४- द्वितीयराशि - बलम्, १५,१६- तृतीयराशिबलम्, १७- चतुर्थराशिबलम्, १८,१९,२०,२१,२२,२३,२४,२५,- शूलदशाविचारः, २६,२७- ब्रह्मग्रहाश्रितदशाक्रमः, २८,२९- चतुर्थराशि के विशेष?, ३०- चरदशाक्रमः, ३१- केतोः शुभत्वम् इत्यादि निरूपणमस्ति ।

द्वितीयाध्याये चतुर्थपादे - १- द्वितीय भाव बलस्य प्रयोजनम्, २,३- द्वार बाह्यराश्योर्लक्षणम् (अ० २ अ० १ पा० १५ सूत्रे), ४,५,६- द्वारबाह्यराश्योः-फलानि , ७,८,९,१०- केन्द्रदशाज्ञानम् तथा अन्तर्दशा विचार ज्ञानंच, ११- कारककेन्द्र-दशाज्ञानम्, १२- केन्द्रादिदशायां विशेषः, १३- कारकादि दशा वर्षज्ञानम्, १४- तेषां शुभाशुभ फलविचारः, १५- मण्डूकदशा विचारः, १६- शूलदशा विचारः, १७- दशाक्रमे विशेषः, १८- नक्षत्रदशा विचारः, अष्टोत्तरीमहादशा, विंशोत्तरी महादशा, योगिनी दशाज्ञानम्, १९,२०- योगार्ध दशाज्ञानम्, २१- दृग्दशा विचारः, २२,२३- राशीनां गणनाक्रमविचारः, २४-२५- त्रिकोणदशा विचारः, २६- फल विचारः, २७- नक्षत्रदशा विचारः, २८,२९,३०- दशेशवशशुभाशुभ विचारः, ३१,३२,३३,३४- अन्तर्दशादौ गणनाक्रमे विशेषः, ३५,३६,३७- दशादीनां शुभाशुभ विचारः इत्यादि निरूपितम् ।

तृतीयाध्याये प्रथमपादे - १- राजयोगाः, २- महाराजयोगः, ३,४,५,६, ७,८-३० राजयोगः, ५- वाहन योगः(यानवन्तः) ,६- अश्व-गजादि (वाहन)योगः, ८- राशीबल, १२-मंडलान्तयोग, १३- युवराजयोग, १४,१५,१६,१७-श्रीमन्तः योगः, २१,२२,२३- महान्तयोग, २४- राजप्रेष्ययोग,२६,२७,२८-राजवंश योग इत्यादि निरूपणमस्ति ।

तृतीयाध्याये द्वितीयपादे - १-२ मृत्युयोग, ३,४,५- आयु: कक्षा ह्रास:, ६,७,८,६- मृत्यु निर्णय नियमा:, १०,११,१२,१३,१४,१५,१६,१७,१८,१६, २०,२१,२२,२३,२४,२५- मृत्यु निमित्तानि, २६- दशा(मृत्युसमयक), २८,२६,३०,३१, ३२,३३,३४ नवमांशदशांशानुसारेण मृत्यु समय,३६,३७,३८,३६,४०,४१-रीष्ट इत्यादि निरूपणमस्ति ।

: कक्षा ह्रास:

:: द्वार-बाह्यराशी ।

। रूद्र ग्रह

= महेश्वर तथा ब्रह्मग्रह

तृतीयाध्याये तृतीयपादे - १,२- मृत्युस्थानम्, ३- राजाज्ञा द्वारा मृत्यु, ४- पुण्यराशी तथा अस्वाभाविक मृत्यु, ५,६- दुष्ट मृत्यु, ७- अकाल मृत्यु, ८,६- बंध गृहे मृत्यु, १०,११- अस्त्र द्वारा, १२,१३,१४,१५- स्वदोषद्वारा मृत्यु, १६-दुष्ट-करण मृत्यु, १७- फांसी, १६- शत्रु द्वारा मृत्यु, २०- गुप्तांग रोग:, २३,२४- मृत्यु प्रकार, २६- (गुल्म,(गुमडा) (गांठ) ग्रन्थी,चैपी-(गला) कण्ठ कर्ण) कण्ठ-कर्ण रोग योग- २७- चैपी रोग, २८- मृत्यु पर्यन्त ताडन , २६,३०,३१- सर्पदंश,३२,३३- विषपान योग, ३४- प्रवाहिका वमन, ३५,३६,३७- स्वाभाविक मृत्यु, ३८,३६- विष, ४०- तीव्र ज्वर, ४१,४२- शत्रु द्वारा मृत्यु, ४३- कुष्ट रोग:(रक्त पित्त), ४४- कौलेरा,४५-खड्ग अथवा प्राणघातक वस्तु द्वारा मृत्यु, ४६- करण मृत्यु, ४७- शत्रुभय, ४८- कूपपतनम्, ४६- गुमडा-फोल्ला आमइ चर्मरोग, ५०-वृक्षोपुटे पतनम्,५१-शत्रु द्वारा मृत्यु, ५३- जातीय रोग-गुप्त रोग, ५३- विष,५४- सर्पदंश , ५५,५६-शस्त्र-(मैली विद्या)

अभिचार, तंत्र क्रिया, ५७- विनाश, ५८- रोगादी (कौलक = $^{1}/_{6}$ राशी = त्रिशांश)
५९,६०,६१,६२,६३,६४- प्रथमत: षष्ठ कौलक पर्यन्तं रोगफलम्, तत्र प्रथमं ललाटे -
केशं- रुधिरं-नेत्रे -हिंसक प्राणी द्वारा घात-जिह्वाग्रे, ६५- वाणी रोग, ६६-
गलगंड रोग, ६७- शोष, ६८- मृत्यु, ६९-मलमार्ग बंध रोग,७०- शस्त्र द्वारा मृत्यु-
७१- बाण द्वारा शस्त्रयंत्र द्वारा मृत्यु, यांत्रिक शस्त्र-( शल्यक्रिया ) ७२- विद्युत-
भयम्, ७३- मार्गे शत्रु द्वारा प्रहारो वा मृत्यु, ७४- शत्रु द्वारा मृत्यु, ७५,७६- शत्रु द्वारा
मृत्यु, ७७- सम्बंधित व्यक्ति वा कौटुम्बिक व्यक्ति द्वारा मृत्यु, ७८- अति परिचित
व्यक्ति द्वारा वा जीवजंतु द्वारा वा- सामान्य विषयक मृत्यु, ७९,८०- वादविवाद वा
अग्नि द्वारा मृत्यु, ८१- कारक-पितृ-मातृ-भ्रातादि द्वारा मृत्यु, ८२-(७६-८१) सूत्र-
विशेष, ८३- प्रेमप्रकरण द्वारा मृत्यु, ८४- प्रेम प्रकरण द्वारा विषपान, ८५-
बंधन मुक्त, ८६- विशेष:, ८७- चतुर्थात् एकादश स्थानम्- अर्थात् लग्नात् द्वितीयं
मारक स्थानम् , ८८- लग्नात् द्वितीयात् द्वितीयम् अर्थात् तृतीय स्थानम् माता पित्रो:
मरणस्थानम् । ८९- लग्नात् तृतीयत: द्वितीयम् अर्थात् लग्नात् चतुर्थं भ्रातृ तथा
सम्बन्धित जनानां मृत्यु स्थानम्, ९०- लग्नात् चतुर्थं द्वितीयं स्थानं अर्थात् पंचम-पत्नी
मृत्यु स्थानम् । ९१- लग्नात् पंचमत: द्वितीयं स्थानम् अर्थात् षष्ठ स्थानम् संतान
मारक स्थान, ९२- लग्नात् षष्ठत: द्वितीयं अर्थात् सप्तमस्थानम् शत्रुमारकस्थानम् ।
९३- मारक स्थाने पापग्रहा: स्युः तदा दु:खद मृत्यु, ९४- लग्नात् अष्टमं वा
आत्माकारक पापग्रह द्वारा युत: अस्वाभाविक मृत्यु- तृतीयं-भ्रातृ-अष्टमात् तृतीयं-
दशमं पापग्रहद्वारायुत: तदा लघुबन्धु- मृत्यु-अर्थात् अस्मिन् योग: पितृ-मातृ-शत्रु:
इत्यादिषु नियमा: अस्ति ।
९५- सप्तमे पाप ग्रहा: तदा स्त्री विपत्तिकारक: ।९०-सूत्रे स्त्रिय: मारकस्थानं पंचमम् ।
९६- लग्नात् अष्टमं, आत्माकारकात् तृतीयं, लग्नात् नवमांश राशीत: षष्ठम्,
आत्माकारक नवमांशात् षष्ठम्- मृत्यु प्रकारस्य निर्णय: अस्ति ।
९७- आत्माकारक नवमांशात् षष्ठं, कारकांशात् षष्ठम् तदा उच्चादि स्थानेषु पतनम् ।

१०१।९८- उपर्युक्त स्थाने कुंभ राशि स्यात्, तदा सरल मृत्यु, अथवा अभानावस्थायां मृत्यु- ९९- लग्नात् अष्टमं, आत्माकारकात् तृतीयं, नवमांशात् षष्ठं, कारकांशात् षष्ठम् कुंभ राशी: स्यात्, तदा ज्ञानवान् मरणम् ।

उपर्युक्त योग द्वारानुसारेण-

१०० लग्नात् ६,आ० ३ न० ६ का० ६ मकर राशि: तदा मृत्यु समये अपचन, प्रवाहिका (मरडो) स्यात् ।

१०२- लग्न ८, आ० ३, न० ६, का० ६ यदि कन्याराशि स्यात्, तथा उग्र अस्वास्थ्यं वा घातक अकस्मात् ।

१०३- सूर्यात्-शनैश्चरश्च द्वितीय राशि द्वारा क्रम-गणना,उत्क्रम

१०४- सूर्यात् शनैश्चरात् द्वितीय राशि लग्नात् नवम स्याय तदा पादरोग-

१०५- सूर्यात्- शनैश्चरात् द्वितीय राशि षष्ठं-अष्टमं अंगुली रोग ।

१०६- सू - श-द्वि- अंगहीन ।

१०७- पापदृष्टे पादहीन: ।

१०८- बलम्, १०९,११०- पूर्ण बल, १११- राशिबल, ११२-राशिबल, ११३, ११४,११५- त्रिकोणे बलम्, ११६- राशीवशात् ग्रह बलम् ।

११७- लग्नात् ६-७-मृत्युनिर्णयम् ।

११८- आ० का- ३

११९- लग्न -पंचमात् दशानुसारेण मातृमरणम् ।

१२०- एवं पितृकारक मातृकारक ग्रहानुसारेण मृत्युनिर्णयम् ।

१२१- भौम नवमांश राशी विशेष:

१२२- मातृ-पितृ निर्याणि दशा ।

१२३-१२४ - चरलग्नात् तृतीयं, आ०का० तृतीयं,(स्थरलग्नात्, आ० का०, द्विस्व० चतुर्थं, आ० का० मृत्यु निर्णयम् ।

१२५- लग्नात् नवमं, नवमात् द्वितीयं अर्थात् दशमं शुभस्थानम् ।

१२६- मृत्यु निमित्तं तृतीय स्थानात् ।

१२७- विशेष- १२८- विशेष । इत्यादि निरूपणमस्ति ।

तृतीयाध्याये चतुर्थपादे - १- आरूढयदम्,२-श्रीमन्त:,योग: (उपग्रह गणना), ३-आधान लग्न, ४- पितृ वर्णन, ५- पितृ अकस्मात्, ६-७,८,९,१०- गर्भ संभवासंभवम्, ११- गर्भ वृद्धि, १२- गर्भपात, १३,१४,१५,१६,१७- गर्भ संभवम्, १८- वर्णादि दशा, १९- गर्भ विचार, २०- आधान लग्न, २२- गर्भाशय स्थिति, २३- गर्भपात, २४- स्राव, २५-२६-प्राणीज जन्म, २६- (वियोनी) ,२७-आधान लग्न द्वारा सुदृढ शरीर, २८,२९,३०,३१,३२,३३,३४- नैसर्गिक बलं, ३५,३६,३७- पुत्र जन्म, ३८- रक्त प्रदर,३९,४०- मासिक (कृष्णवर्ण), ४१- मासिक(सुवर्णवर्ण), ४२- नीलवर्ण:, ४३- सुवर्ण, ४४- श्वेतवर्ण, ४५- संतानं गौरवर्ण, ४६- अन्य उदाहरणम्, ४७- पुत्र संभव, ४८- पुत्रनाश:, ४९- पुत्रलाभ, ५०- वर्ण-क्षीणह्रासवृद्धि, ५१- यमल जन्म, ५२- शरीरावयव विवरण ५३,५४- शरीरावयव विशेष विचार दोष विचार-अर्थात् विशेष ।

चतुर्थाध्याये प्रथमपादे - १- शरीर, २- हृदयम्, ३- शिर:, ४- मुखम्, ५- कण्ठ:, ६- बाहु:, ७- उदरम्, ८- पदनलीका, ९- पृष्ठ:, १०-गुद:, ११-पादौ,

१२- नेत्रौ, १३- कर्णौ, १४- नासिका, १५,१६,१७,१८,१६-२०- कालपुरुष, २१- शरीरे चिन्ह ज्ञानम्, २२- मातापितरौ जन्म, २३- क्लीब, २४- भावविचारः,। २५- व्यभिचार योगः, २६- वर्णभेद, २७,२८,२६,३०,३१,३२- वर्ण विचार, ३३,३४- पुत्री जन्म, ३५,३६- सुखी संतान, ३७- वैपरीत्यम्, ३८- सुखी संतान, ३६- मरणान्तरं मुक्तिः, ४०-(विज्ञान) विद्याप्रिय संतान । ४१- सुदृढ़ तथा बुद्धिमान, ४१-४२-प्राणपद, ४३- मधुर बालक, ४४- रक्तवर्ण, ४५- कुरूप ४६- श्रेष्ठ, प्रतिष्ठा, ४७- दंभी, ४८- पितृ प्रकृति, ४६- मातृ प्रकृति, ५०-विरूपः, ५१- विपत्ति, ५२- कालरूप?, ५३-दीर्घायु (४२-५४-प्राणपद तथा आधान लग्न द्वारा फलम्) इत्यादि निरूपणमस्ति ।

चतुर्थाध्याये द्वितियपादे- १-३-मारकः, (संदर्भः अस्मिन् ग्रन्थे अ-२,पाद१, सूत्र १४), ४ राशिबलं, ५-६-भावदृष्टि; ७-८ दन्त-ओष्ठ दोषं, ६,१०-यमल, ११-यमलपात; १२- एकमासपूर्व जन्म, १३- समयानुसारं जन्म-(६मास), १४-दश। एकादश मासे वा जन्म, १५- द्वादशमासे जन्म, १६,१७,१८- दशमेमासे जन्म, १६,२०,२१- समय प्रमाणं, २२- भाव बलं, २३,२४- बाल दोषं, २५,२६,२७- दुराचारी योग, २८-२६,३०,३१,३२- जन्म लग्न शोधन प्रकारः, ३३- बाल रोग, ३४,३५- व्ययकारक बालक; ३६- शुभ कर्मकारक(आजीविका), ३७- निरोगी बालक; ३८- सुदृढ़ बालक, ३६- सुखी, ४०- भविष्य शुभफल नाशक योग; ४१- सुंदर बालक; ४५- प्रबल शरीरं, ४६- कुष्ठ दुःखदायी, ४७- स्थिर-(काल बल- ग्रह-भाव बल) निरूपणमस्ति ।

चतुर्थाध्याये तृतीयपादे - १-स्त्रीजन्म, २- आधान-होरा लग्न द्वारा जन्मसमय निर्णय, ३- जन्मलग्न, ४,५,६- सूक्ष्मकाल, ७,८- नवमांश, ९- वर्णाः, १०- पुत्र जन्म, ११- स्त्री जन्म, १२- क्लीष, १३,१४- वर्ण, जाती इत्यादि वर्णद लग्न नवमांश द्वारा, १५,१६- वर्णद दशा , १७- धातु-वर्ण वर्णद लग्नानुसार, १८- वर्ण-स्वरूप इत्यादि आ०का० नवमांशानुसार, १९,२०,२१- प्रसिद्धाः, २२-प्राणपद, २३- घाटिका लग्न, २४- अंश लग्न वा भावलग्न, २५- विघटीलग्न, २६,२७-पुत्र, स्त्री जन्मक्रमेण, २८- उपर्युक्त योग, २९-लग्नानुसार जाति, ३०- होरालग्नानुसार तथा आधान लग्नानुसार एतेषु संबंधानुसारेण प्रसवकाल, ३१ राहु चंद्र होरालग्नानुसारेण स्त्री जन्म। ३२,३३- पुरुष जन्म, ३४- स्त्री जन्म, ३५- कुरूप?, ३६- सुंदर, ३७,३८- जार जन्म, ३९- कामी, प्रवीणाचमश्च,४०-होरालग्न नवमांशानुसारेण फलं, ४१- कामी, ४२- भावुक, ४३,४४- व्यभिचारी स्त्री, ४५- पूर्वानुसारेण, ४६-४७-विधवा, ४८,४९-५०- भर्तृहंसि, ५१- अ०१-पा०४ सू०१० अनुसार, ५२-सूत्र ५० अनुतत्र षड्वर्गानुसारेण फलं निगदितं । ५३- स्वरूपं, ५४- बुद्धिबाहुल्यवान, ५५- दुर्गन्धयुक्त शरीरवान, ५६- वक्रदंत, ५७- क्रोधी, ५८- लघुताग्रंथि द्वारा पीडित, निंदित, पापी, ५९- सौम्य, ६०- पापी, ६१- गुणवति, ६२- सम, ६३- मिश्र, ६४- मिश्र, ६५- नीचे विपरीतं, ६६- भाग्योदयकारक, ६७- मिश्रयोग, ६८- अधिकशिलाक, ६९- लग्न नवमांसानुसारेण फल,७०- चारित्र्य ,७१- कामी, ७२- मौजी,७३-पापी, ७४,७५,७६- बाल विधवा अस्मिनकाले बाललग्नं सर्वकार नियमानुसारेण नास्ति संभव । ७७,७८- कुरूपी क्रोधी, ७९- बंध्या, ८०- पतिव्रता, पति परायणा, ८१,८२,८३- सौभाग्यवती स्त्री, ८४- पुरुष समान वर्तनं, स्वरूपं, ८५- शुभभावं, ८६- स्वोपार्जितं, प्रतिभावान, ८७,८८-चांडालिनि, ८९- वर्णदलग्न, भाव फलं

अ० ३, ४१-४ सू० १४, १५, १८), ६०,६१,६२ चक्षुहीन, ६३- वर्णदलग्न, त्रिकोण अनुसारेण फलं, ६४- ग्रहबलानुसारेण फलं, ६५- प्रथममास फलं, ६६- द्वितीयं, ६७- तृतीयं, ६८- चतुर्थं, ६८-पंचमं, ६८- षष्ठं, ६६-सप्तं, १००-अष्टमं, १०-नवमं, १००- दशममासफलं, १०१- अष्टमे नवमे मासे विपत्तियोग, १०२- सप्तमे मासे अशुभ फलं, १०३-शुभयोग, १०४-शुभयोग, १०५-वियोनि जन्म, १०६- अस्वाभाविक -जन्म(शस्त्रक्रिया), १०७- स्वरूपं , १०८- स्वरूप, जाति,१०६-श्वासमार्ग बंध, ११०- प्रसव विलंब(शस्त्रक्रिया), १११,११२- दुःखद प्रसव, ११३,११४- प्रयत्नेन सुखद-प्रसव, (१०८ सूत्रानुसार), ११५- अपवादः, ११६-क्रम-उत्क्रम-पदानुसार फलं(अ० १, पाद-१ सू० २५-२६-२७), ११७-११८ पुत्र जातक, ११६-स्त्री जातक,१२०-सूर्य -बृहस्पति द्वारा वर्ण ज्ञानं, १२१- आत्मकारण, लग्न द्वारा जाति ज्ञानं । इत्यादि निरूपणाम् अस्ति ।

चतुर्थाध्याये चतुर्थपादे -

१-२ पुरुष-स्त्री जन्म, ३- पुरुष जन्म, ४- स्त्री जन्म, ५-स्त्री जन्म, ६- आद्य ऋतु, ७- विधवा, ८,६,१०,११- विधवा, १२,१३- स्त्री जन्म,पितृ-मरणांतर जन्म, १४- वियोनि, १५- धातु वर्ण ज्ञान, १६-१७- सप्तम् भाव वशात् पितृ ज्ञानं, १८- वियोनि जन्म, १६,२०-२१- सुन्दर , २२- जारकर्म द्वारा जन्म, अनौरस जन्म, २३,२४- औरस जन्म, २५,२६,२७- गर्भ संभव, २८- अनुकूल जन्म, २६,३० अनुकूल जन्म, ३१- गर्भ संभवन,३२,३३,३४-३५- निश्चय गर्भ संभव, ३६- ज्ञानात-अज्ञानात जन्म, ३७- पुत्र जन्म,३८- पुत्र जन्म,३६,४०- पुत्र जन्म । इत्यादि निरूपणमस्ति ।

जैमिनि महर्षिणा परम्परानुसारेण अस्य ग्रन्थस्य निर्विघ्नतया समास्यर्थं मंगलाचरणादारम्भं स्वीकृतम् । वस्तु संसूचनात्मकं मंगलाचरणमिदं फलित ज्योतिषस्य महात्म्यं सूचयति उपदेशं व्याख्यास्याम: [१]

उ:- शंकर: तस्य पदं स्थानमिति उपदं तस्मिन् उपदे काश्यामित्यर्थ: शं, लोककल्याणशास्त्रं अथवा उपदिश्यते प्रतिपाद्यते पूर्वजन्मार्जित शुभादिक कर्माननेनेति उपदेश: । यत्र । [२] अनेनेदं ज्ञायते यत् जैमिनि महर्षीणां इष्टदेवता भगवान् शंकर एवासीत् । महर्षिणा काश्यामेव अस्य सूत्रात्मक ग्रन्थस्य निर्माणं कृतवन्त: । राशिदृष्ट्या विचार:, अंक वै संकेतज्ञानं, अर्गला योग:, कारकनिरूपणम्, चरदशा विचार:, वर्णदराशिदशा ज्ञानम्, कारकांशफलम्, गुलिकस्वरूपम्, पदलक्षणम्, राजयोग:, उपपद निरूपणम्, प्रधानतयाप्रतिपादितमस्ति । द्वितीय अध्याये आयु: प्रकारं, रुद्रादिग्रह निरूपणम्, पितृ-मातृ कारक-मारक विचार:, नवांशदशा विचार, स्थिरदशा विचार:, राशिबल विचार:, शूलदशा, द्वारबाह्य राश्यो: लक्षणम्, केन्द्रदशा, मण्डूकदशा, शूलदशा विचार:, नक्षत्र दशा, त्रिकोण दशा इत्यादिना मुख्यविषया महर्षिणा निरूपितम् ।

तृतीयेऽध्याये राजयोग:, नवांशदशानुसारेण मृत्युयोग:, रोगयोग:, आधानलग्न विशेषता इत्यादीन् मुख्य- मुख्य विषयान् अधिकृत्य ग्रन्थकारेण प्रतिपादितम् ।

चतुर्थेऽध्याये सामुद्रिक पुत्र कन्या जन्म विचार:, बालरोग:, जन्म समय निर्णयं तथा विविध जन्मयोगा: आदि निरूपितमस्ति ।

सामान्यतया वर्तमानेकाले जन्मपत्रिकायाः भिन्नप्रकाराणि अनेकानि रूपाणि दरीदृश्यन्ते । तेषां मध्ये प्रदेश भेदरूपाः, राज्यभेदरूपाः, पंचांगभेदरूपाः, रूढ़ि-भेदरूपाः, धर्मसंप्रदाय भेदरूपाः च दृश्यते । ज्यौतिषशास्त्र दृष्ट्या एतत् सर्वं समानमेव तथापि पंचांगभेदेन क्वचित्-क्वचित् भिन्नरूपाः वर्तन्ते अर्थात् सर्वप्रथमं पंचांगः जन्मपत्रिकायाः मूलं इत्यहम् मन्ये । पंचांगः राजकीय, सामाजिक, धार्मिक, व्रतोपवासादिक कार्यस्य प्रतिनिधिरूपाः वर्तते । पंचांगः भूतकालीन राजकीय तथा सांस्कृतिक ऐतिहासिक स्वाभाविकं फलमिति । भारते पंचांगएकीकरणाय भारत सर्वकारस्य वैज्ञानिक तथा औद्योगिक संशोधन परिषदेन नवम्बर मासे १९५२ तमे वर्षे कलकत्ता नगरस्थ अणुविज्ञान संस्थायाः नियामकः प्रोफेसर एम० एन० सहा महोदयानां अध्यक्षपदेन पंचांग संशोधन समितिः निर्मितः । भारतेषु सर्वेषु प्रदेशेषु प्रचलितानां पंचांगानां विवरणं अवलोक्य वैज्ञानिक दृष्ट्या विचार्य एकमेव पद्धतिमवलम्ब्य वैज्ञानिकैः स्वीकृतम् ।

पण्डित जवाहरलाल नेहरू महोदयेन स्वकीये पत्रे फेब्रुवरी मासस्य अष्टादश दिनांके १९५३ तमे ख्रीष्टाब्दे संशोधन समितेर्प्रस्तावं निरीक्ष्य संतुष्टः अभवन् । भारत सर्वकारेण प्रस्तावमवलम्ब्य राष्ट्रीय पंचांगस्य प्रकाशनं कृतम् । महर्षि जैमिनि प्रतिपादिते "होरादयः सिद्धाः" इत्यादिषुसूत्रे जन्म पत्रिका निर्माण प्रकारो सार रूपेण सूत्र द्वारा संकेतितं वर्तते । तत्र षड्वर्गं, सप्तवर्गं, षोडशवर्गः, प्रतिपादितः सन्ति ।

ज्योतिषशास्त्रे जन्मपत्रिका विषये प्रथमं केशवीयजन्म पत्रिका, जैमिनीय जन्म पत्रिका, तथा सामान्य जन्म पत्रिका चैति त्रिविधा इति ।

(१) जैमिनीयपत्रिका :

राशिदृष्ट्या विचार:, अर्गलायोग:, कारक विचार:, चरदशा, वर्णदराशि-दशा, गुलिकलग्नसाधनम्, पदं उपपदम्, आयुर्विचार:, रुद्रादिग्रह निरूपणम्, मारक-दशा, नवांशदशा, स्थिरदशा, राशिबल विचार:, शूलदशा, केन्द्रदशा, मण्डूकदशा, शूलदशा, नक्षत्रदशा, अष्टोत्तरीमहाशा, विंशोत्तरीमहादशा, योगिनीदशा, दृग्दशा, त्रिकोण दशा इत्यादय: सन्ति ।

२- केशवीय जन्मपत्रिका :

केशवीय जन्मपत्रिकानुक्रमणिका

जन्मकालीन :-

१- सूर्योदयादिष्ट कालज्ञानम्
२- स्पष्ट सूर्य:
३- अयनांशसाधनम्
४- दशम चतुर्थभावयो: साधनम् ।
५- भयात साधनम्
भभोग साधनम् ।
स्पष्ट चन्द्रसाधनम् ।
चन्द्रगति साधनम् ।

(अ) देशान्तरम्च (ब) वेलान्तरम
(क) सूर्योदय, सूर्यास्त तथा दिनमानम्
(ड०) चरकालं तथा चरान्तरम् ।

६- चालनम

७- भौमादि ग्रहाणां स्पष्टीकरणम् ।

८- कारक साधनम् ।

९- लग्न साधनम् ।

लंकोदयमानात् स्वोदयमान साधनम् ।

चारखण्ड साधनम् ।

पलभा

१०- नतोन्नत कालज्ञानम् ।

११- लग्न सप्तमभावयोः साधनम् ।

१२- लग्नादि द्वादशभाव ससन्धि साधनम् ।

१३- ग्रहाणां दृष्टि साधनम् ।

दृष्टा ग्रह दृश्य ग्रह

१४- भावो परिग्रह दृष्टि साधनम्

दृष्टा ग्रह दृश्य भाव

१५- उच्चनीच विभाग ज्ञानम्, : पंचधामैत्री साधनम्

मूलत्रिकोण ज्ञानम् । : अ- नैसर्गिक तथा तात्कालिक मैत्री ज्ञानमावश्यकम् ।

१६- उच्च बल साधनम् ।

१७- सप्तवर्गी बल विचार साधनम् ।


१८- युग्मायुग्मभांश बल साधनम् ।

१९- केन्द्रादिबल बल साधनम् ।

२०- द्रेष्काण बल साधनम् ।


३- सामान्यजन्म पत्रिका :

जन्मलग्न, सूर्यादिस्पष्टग्रह, लग्नादि द्वादशभाव, षोडश वर्गः, बालादि अवस्था, गर्वितादि अवस्था, कारक, मध्यमायु, स्पष्टायु, उच्चरश्मि, महादशान्तर्दशा, प्रत्यन्तर्दशा, सूक्ष्मदशा, प्राणदशा, अष्टकवर्ग, शुभाशुभ फलादेशः । अस्मिन् ग्रन्थे राशिदृष्ट्या विचारः विशेषतया प्रतिपादितमस्ति । अन्येषु ग्रन्थेषु राशिदृष्ट्या विचारः न समुपलभ्यते । अत्र आकृति दर्शनपूर्वकं दृष्टिबोधक चक्रं दर्शितं वर्तते ।




महर्षिणा राशिदशा, राशिस्वरूपमपि सम्यक्तया निदर्शितम् । अत्र राशि स्वरूपंकोष्टक (चित्र) द्वारा दर्शितमस्ति । राशिदृष्ट्या ग्रहाणां दृष्टिः विचार्य निरूपितम् ।[3] जैमिनीय सूत्रे कश्यपादि वर्ग द्वारा अंकसंकेतज्ञानं ग्रन्थवैशिष्ट्यं 'सर्वत्र सवर्णाभावा राशयश्च' इति सूत्र द्वारा प्रतिपादितं ।

# ॥ अथ दृष्टि चक्रम् ॥




वृद्धाः  चरं धनं विना स्थास्नुं स्थिरमन्त्यं विनाचरम् ।
युग्मं स्वेन विना युग्मं पश्यन्तीत्यय मागमः ॥

अस्मिन् सूत्रग्रन्थे वर्णितं दृष्टिसाधनं अन्यग्रन्थापेक्षया विशेषतया भिन्नरीत्या च प्रतिपादिता दृश्यते । महर्षिणा 'अभिपश्यन्त्यृक्षाणि, पार्श्वभे च'[4] (अर्थात्) चरराशिना स्वस्थानात् अष्टमोराशिः सम्मुखस्थो भवति । तथा च पंचमैकादशस्थराशिं विलोकयन्ति । स्थिर राशिनां सम्मुखः षष्ठः तथा त्रिनवौ पश्यन्ति । द्विस्वभावानां राशिनां सप्तमं तथा चतुर्थं दशमौ पश्यन्तीत्यर्थः इति महर्षि जैमिनिमतम् ।

ताजिक शास्त्रे ताजिक नीलकंठ्याम् प्रत्यक्ष स्नेह, गुप्तस्नेह गुप्त वैरा तथा प्रत्यक्ष वैरा इति चतुर्भिप्रकारेण दृष्टिप्रकारान् तथा साधन प्रकारं सफलंच प्रतिपादितं वर्तते ।[5]

हायनरत्ने दृष्टि विषये उक्तं यथा —

हायन रत्नेषा

अस्या दृष्टि परिणामं चाह समर सिंहः ।
नवपंचयोर्दृष्टिः पादोना सर्वदृष्टितः ।
मैलापक दृष्टिरियं प्रत्यक्ष स्नेह दृष्टिश्च ।।
तार्तीयैकादशयोर्दृष्टौ यो वीक्षते तृतीयदशा ।
तद्दृष्टिस्त्र्यंशोनान्यस्य तु षड्भाग दृष्टिश्च ।।
अनयोर्गुप्तस्नेहा दृष्टिः सर्वत्र कार्यसिद्धीकरी ।
दशमचतुर्थे दृष्टिः पाददृगिह गुप्तदुर्जनाख्यातु ।
या चोभयसप्तमके सकला प्रत्यक्ष दुर्जना दृष्टिः ।

एकर्क्षस्थितयोरप्युभयो दृष्टिर्मता सकला ।
दृष्टिश्च सा उभयसप्त स्वाम्बुनि तिस्रो रिदृश: जुताख्यास्यु: ।

तथा च वामन:

पंचमे नवमे दृष्टि: सर्वसौख्य फलप्रदा ।
ऋक् प्रकटीकुरुते ह्येषा मित्राणि स्वजनांस्तथा ।।
तृतीयैकादशे दृष्टि: सदा स्नेह प्रवर्द्धिनी ।
सुत सन्तोषदा भव्या ह्यायुवृद्धि धनप्रदा ।।
चतुर्थे दशमे दृष्टि गुप्तदुर्जन भेदिका ।
मित्रघातकरी दुष्टा शोकसन्ताप वर्द्धिनी ।
उभयो सप्तमा दृष्टि: प्रकटा रिपुभेदिनी ।।
विवादं विग्रहं युद्धं संकटं च करोति हि ।
एकर्क्षे बलिनी दृष्टि: प्राधान्यात्कार्यसाधिनी ।।
स्वस्थाने फलदा सैया मित्रपक्षास्तथैव च ।
तृतीयैकादशे पादं दलं व्योम चतुर्थयो: ।।
त्रिकोणे व्यंगध्रिर्मूतिस्थे पूर्ण पश्यन्ति खेचरा: ।।

ताजिकसारे च

पादं त्रिरुद्रे स्वदलं स्वतुर्के
पादत्रयं स्थान्नवपंचमे पि ।
पश्यन्ति पूर्ण समसप्तके च
ग्रहा न चान्यत्र विलोकयन्ति ।।

ताजिकशास्त्रे दृष्टि: द्वादशान्तरे भवेयु: इति समरसिंह महोदस्य मतम्, यथा —

सर्वास्तैचाहि दृशो द्वादशभागान्तरे भवेयुचेत ।
तत्सविशेषा ज्ञेया दृष्ट्यनुसारात्सर्वमिति ।।

जातस्य शुभाशुभ फल ज्ञानार्थं ग्रहदृष्टि: गणितक्रिया महत्वपूर्णमास्ति् कैश्चित् (स्वद) उक्तं —

फलं दृष्टिप्रमाणेन स्वयं यच्छन्ति खेचरा: ।
तत्फलं बलमानेन ज्ञात्वा देश्यं शुभाशुभम् ।।

दृष्टि विषये प्रमाणानि यथा —

१- ३०° - अंशादि +२
२- १° + स्वभागत्रयं
३- २° ÷ ६ = ल०
४- स्वांश - ल = फ, ४०-फ =दृष्टि
३° अंशादिक + १५
५- ४° अंशादिकं एकार्द्ध कार्यं (१½) ४५-१-½- = दृष्टि ।
६- ५° अंशादिक + २ =
७- ३०° - ६° +२ =
८- ७° अंशादिकं (७+१½ )

९- $45^{0} - 8^{0}$

१०- ९° अंशादिक ÷ ६ = फल, १५ - फल = दृष्टि

११- १०° अंशादिक ÷ ३ = फल, १० - फल = दृष्टि

१२- ११° +२ = दृष्टि

| | | |
|---|---|---|
| अर्थात् ३, १० दृष्टि | | एकपाद = १५ कला |
| ९, ५ | ,, | द्विपाद = ३० ,, |
| ४, ८ | ,, | त्रिपाद = ४५ कला |
| ७ | ,, | सम्पूर्ण = ६० ,, |

श्रीपृथुयश महोदयेन षट्पंचाशिका नाम्नै प्रश्न-ज्यौतिष ग्रन्थरत्नै उक्तं -

यो यो भाव: स्वामि दृष्टो युतो वा
सौम्यैर्वा स्यात्तस्य तस्यास्ति वृद्धि: ।
पापैरेवं तस्य भावस्य हानि:
व्यक्तव्या वा जन्मतो प्रश्नतो वा ।।[६]

W. Frankland
New Measures in Astrology, Page-15.

"The Apostle said " As the body is of many parts yet all members of one body, so are we all members of one body."

Astrology illnstrates this in teaching us the relationship between the heavens and man the operation of Laws whereby the part( in this case man) is a member of the whole and participates in the influence of the whole."

श्री चन्द्रकान्त भट्ट विरचिते सरल ज्योतिष ग्रन्थे दृष्टि परिभाषा कृता वर्तते । तत्र ६०$^0$ व १२$^0$ अंशान्तरे ऽ ग्रहों मध्ये शुभं फलं वाच्यं तथा परस्परं सहायक कारकं च ६०$^0$, १३५$^0$, १५०$^0$, १८०$^0$ इत्यादि अंशान्तरे ग्रहस्य प्रभाव: प्रतिकूल: तथा परस्पर बाधको भवति । दृष्टि ज्ञानार्थं निम्नलिखित चक्रद्वारा दृष्टिसाधनं प्रतिपादितम् ।

| दृष्टि | संज्ञा। चिन्ह | राश्यान्तर | अंशान्तर | प्रभाव | द्विप्तांश |
|---|---|---|---|---|---|
| १ | २ | ३ | ४ | ५ | ६ |
| समक्रान्ति ; | | - | - | मिश्र | १$^0$ |
| युति ; | ० | ० | ० | मिश्र | ८$^0$ |
| द्वादशांश ; | | १ | ३०$^0$ | अल्पशुभ | २$^0$ |
| अर्द्धकेन्द्र ; | | १$\frac{१}{२}$ | ४५$^0$ | अल्पपाप | ४$^0$ |
| अर्द्धत्रिकोणम् | | २ | ६०$^0$ | शुभ | ७$^0$ |
| चतुष्कोण(केन्द्र); | | ३ | ६० | पाप | ८$^0$ |
| नेव त्रिकोणम् | | ४ | १२$^0$ | प्रबलशुभ | ८$^0$ |
| सार्ध केन्द्र; | | ४$\frac{१}{२}$ | १३५$^0$ | अल्पपाप | ४$^0$ |
| षडाष्टक ; | | ५ | १५०$^0$ | अल्पपाप | २$^0$ |
| प्रतियोग ; | ४ | ६ | १८०$^0$ | प्रबलपाप | ८$^0$ |

## ग्रन्थानुसारेण ग्रह स्वरूप विषये किंचिद् विवेचनम्

### विषय निरूपणम्

भारतीय ज्योतिषशास्त्रे तथा च पाश्चात्य खगोल शास्त्रे पि ग्रहाणां महत्वपूर्णं स्थानं वर्तते । आदौ होराशास्त्रे ग्रहस्वरूप विषये निरूपणं दृश्यते । ग्रहाणां विषये जैमिनीय सूत्रेपि व्यापकत्वेन चर्चा दृश्यते । पदधिकृत्य फल कथनं भवति । वृहत्पाराशर होराशास्त्रे पि प्रथमध्यायादारभ्य तद् विषयकं चर्चा दृश्यते । जैमिनीय सूत्रे प्रथम पादादारभ्य ग्रहाणां विषये विवरणं प्राप्यते । ग्रहणाति गति विशेषानिति फल दातृत्वेन जीवानित्यर्थे विभाषा ग्रह: ।[७] इति पाणिनीयेन सूत्रेणाचि प्रत्यये सति ग्रह शब्द: सिद्ध्यति । वेदे पि यद्-गृहणाति तस्माद् ग्रह: इतिनिर्दिष्टम् ।[८] अनन्त संख्यकानि ज्योति बिम्बानि आकाशे दृश्यन्ते तानि सर्वाणि स्थिर स्थानानि नक्षत्राणि इति कथ्यन्ते ग्रहस्तु पूर्वाभिमुखं गच्छन्ति, तानि नक्षत्राणि सततं ग्रहणान्ति अत एवैते ग्रहा इति प्रोच्यन्ते । ग्रहाणां अपि प्रकाशक प्रकाश्य रूपेण भेद द्वयं इति आदौ पाराशरेणो-ट्टंकितम् ।ग्रहाणां नव संख्या महाभारते दृश्यते । यत्र ग्रहाणां सप्त संख्या प्रोक्ता तत्रराहु केतु विहाय बोध्या । फलकथनार्थं ग्रहाणां वर्णलिंगादि ज्ञानमावश्यकं भवति ।

क्रूरग्रहा: कृष्णपक्षे दक्षिणायने शुभग्रहाश्च शुक्ल पक्षे उत्तरायणे बलिनो भवन्ति ।

वर्षमास-दिन होराणां स्वामिन: क्रमादुत्तरोत्तरं बलिन: सन्ति।शनि मंगल बुध,गुरु,शुक्र चन्द्रादित्याश्चैते प्युत्तरोत्तरं बलिनो निगदिता: ।

## तात्कालिक मैत्री विचार:

स्वाधिष्ठित स्थानात् ग्रहा: द्वितीय तृतीय चतुर्थैकादश द्वादशास्था मित्राणि, प्रथम पंचम षाष्ठ सप्तमाष्टम नवम दशम स्थाश्च शत्रव: भवन्ति ।

चन्द्र बुध शुक्र सूर्य परिवेश कार्मुक गुरु व्यतिपात शनि केतवश्च क्रमान्मेषादीनां राशीनामधिपतय: सन्ति ।

## पंचधामैत्री विचार:-

मित्रे मित्रे इति मित्रम् । समे मित्रे मित्रम् । शत्रौ मित्रे सम: । समे शत्रौ शत्रु: । शत्रौ चाति शत्रु: । अयंभावो त्र नैसर्गिको यदि कश्चिद् ग्रहो मित्रं तात्कालिके पि मित्रं तदाति मित्रम् । एवमेव यदि नैसर्गिके समस्तात्कालिके च मित्रन्तदा मित्रमित्यादिज्ञेयम् ।

## फले बल विचार :-

उच्चस्था ग्रहा: पूर्णं, त्रिकोणस्था: पादोनं, स्वगृहस्था: पादमात्रं शुभं फलं प्रयच्छन्ति । एवं वैपरीत्येनीचस्था: शत्रु गृहस्थाश्च पूर्णं, समस्था: स्व - गृहस्थाश्च पादोनं, मित्रस्था अर्द्धमुच्चस्था: शून्यमशुभं वा फलं प्रयच्छन्ति ।

## ग्रहाणां दृष्टि विचार: -

ग्रहास्तृतीयदशमस्थाने पाद दृष्ट्या, नवम पंचम स्थाने द्विपाद दृष्ट्या, चतुर्थाष्टमस्थाने त्रिपाद दृष्ट्या सप्तम स्थानंच पूर्ण दृष्ट्या पश्यन्ति ।तृतीय दशमास्थाने शनि: नवम पंचमस्थाने गुरु: चतुर्थाष्टमस्थाने भौमश्च पूर्णदृष्ट्या पश्यन्ति ।

भावानुसारेण ग्रहाणां शुभफलम् -

पंचमे गुरुस्तृतीये भौमः षष्ठे शनिरेकादशे च सर्वे ग्रहाः शुभाः सन्ति । शनेरुच्चत्वं शुभम् । नवमे शुभा ग्रहाः शुभा पापश्चाशुभाः स्वगृहं विना ज्ञेयाः । स्वगृहस्थश्च पापो पि शुभः प्रोक्तः ।

दृश्य चक्राधगाः ग्रहाः प्रत्यक्ष फल दायकाः । एवं चादृश्यगाः(लग्नादूर्ध्वं सप्तम भावान्तं भुक्तांशावधि पर्यन्तं) ग्रहाः परोक्ष फलदायका भवन्ति । जाति-विचारे पि सारावल्यां चन्द्रो वैश्यानां बुधः शूद्राणां शनिरन्त्यजानां राहुश्च म्लेच्छानां स्वामी निर्दिष्टाः । सर्वार्थ चिन्तामणौ राहुश्चाण्डालः केतुश्च वर्णसंकरो निगदितः ।[९] नारद पुराणे पूर्वाग्नि दक्षिण नैऋत्य पश्चिम वायव्योत्तरेशानानां दिशानां च सूर्य-शुक्र-मंगल- राहु- शनि- चन्द्र- बुध-गुरवश्च क्रमात्स्वामिनः प्रोक्ताः ।

ताम्र-मणि-सुवर्ण-कांस्य-रजत मौक्तिक-लोहानां धातूनामपि क्रमात्सूर्यादयो ग्रहा अधीशा ज्ञेयाः ।[१०] बृहज्जातके स्थूल नवीन अग्नि दग्धार्द्र मध्यम सुदृढ जीर्णानि च वस्त्राणि क्रमात्सूर्यादीनां प्रोक्तानि । राजनीत्यामपि साम्नो गुरु- शुक्रौ, दण्डस्य रवि भौमौ, दानस्य सोमः, भेदस्य राहु केतु शनि बुधाश्च स्वामिनो ज्ञेयाः।[११]

ऋग्यजुस्सामाथर्वणां गुरु शुक्र भौम बुधाः क्रमात्स्वामिनः प्रोक्ताः । एवं स्वर्गस्य गुरुः, पितृलोकस्य चन्द्र शुक्रौ, मर्त्यस्य रवि-भौमौ, नरकस्य शनि-बुधौ स्वामिनौ भवतः ।

जैमिनीय सूत्रे पुरुष ग्रहा रवि मंगल गुरवो राश्या: प्रथम भागे स्त्री ग्रहो चन्द्र शुक्रौ तृतीयभागे तथा नपुंसकौ शनिबुधौ मध्य भागे बलिन: सन्ति । चन्द्रो निशाया: प्रथम भागे शुक्रो मध्यभागे, भौमश्चान्तिमे भागे बली भवति । बुधो दिनस्य प्रथमे भागे, रविर्मध्यमे शनिश्चान्तिमे भागे बलवान् भवति । गुरुश्चाह्नो रात्रि एव बली भवति । ताम्रशुक्ल रक्त हरितपीत चित्र कृष्णा- वर्णा: क्रमात्सूर्यादीनाम् ।[१२] सूर्य पुतश्चन्द्र: , चतुर्थ स्थान स्थितो बुध:, पंचमस्थो गुरुर्द्वितीयस्थो भौम: । षष्ठस्थ: शुक्र: सप्तमस्थ: शनिश्च निष्फलो भवति । राहोर्दोषं बुधोहन्ति, राहुबुधयोर्दोषं शनिर्हन्ति । राहुबुध शनि दोषं भौमोहन्ति, राहु बुध शनि भौमानां दोषं शुक्रोहन्ति । एवमेतेषां पंचानां दोष गुरुस्तथैव तेषां षण्णां चन्द्रस्ते - थैवतेषां सप्तानामुत्तरायणस्थ: सूर्योहन्ति ।

## ग्रहाणां स्पष्टीकरण प्रकार:

जैमिनीय सूत्रे जन्मकुण्डली माश्रित्य ग्रहाणां योगायोगेन दशादिभि: फलकथनस्यैव वैशिष्ट्यम् । अतोस्मिन् ग्रन्थे ग्रह स्पष्टीकरण ज्ञान प्रकारान्य विशद चर्चा नोपलभ्यते । स प्रकार: सूर्य सिद्धान्तादि ग्रन्थेषु स्वत: स्पष्टम् । सूर्य सिद्धान्त ग्रहलाघव ज्योतिर्गणितादिकरण ग्रन्थानाश्रित्य पंचांगानां निर्माणं भवति अत एवात्त पंचांगमधिकृत्य ग्रहाणां स्पष्टीकरण प्रकारो निर्दिष्ट : । स प्रकारो व मूल ग्रन्थीयो यवा प्रक्षिप्त इति प्रश्न उत्पद्यते । सच च प्रक्षिप्त एव इति विज्ञेयम् । यत: पंचांगस्य चर्चैयं ग्रन्थे न्यात्र कुत्रापि नास्ति । पंचांगे तिथि वार, नक्षत्र योग करणानां सन्निवेश: । पराशरात्परवर्निष्ठ मानसावारी प्रभृतिकेषु ग्रन्थेषु पंचांगानाश्रित्य। फलप्रकारो प्युपलभ्यते ।

अवश्चात्रापि पंचांगमाश्रित्यैव स्पष्टीकरण प्रकारो निरूप्यते । इदमेव सौकर्यम् । पंचांगे वा ग्रहाणां स्पष्टा पंक्ति विंघते सा पंक्तिरिति कथ्यते । तथा च यस्मिन् काले ग्रहसाधनापेक्षा भवेत् स चेष्ट काल इति कथ्यते । इष्टकालात् पंक्तिरग्रे भवे-तदा ऋण चालनं भवति । यदि च पंक्ति: पृष्ठे भवे-तदा धन-चालनं भवति । एवं च इष्ट पंक्त्योर्दिन घटी पलादिक स्यान्तरं भवति तच्च चालनं प्रोच्यते । तच्च चालनं यदि धन चालनं भवेत्तदा पंक्तिस्थ ग्रहस्य गत्या गुणीकृत्य षाष्ठिसंख्यया विभजेत् । लब्धांशादिकं पंक्तिस्थ ग्रहे हीनं कुर्यात् । ततश्च तात्कालिको ग्रह: स्पष्टो जायते । यत्रान्तरे दिन संख्यायां दिनसंख्या हीना न भवेत्तत्र दिन संख्यायां सप्त संख्यां संयोज्यतां हीनां कुर्यात् । एवं च राशि संख्यायां राशिसंख्या न हीना भवेत्तदा द्वादश संख्यां संयोज्य तां हीनां कुर्यादिति ज्ञेयम् । पंक्तिस्थ ग्रहस्य स्पष्टकालो यै रात्रौ भवति तस्य मिश्र मानमिति संज्ञा ज्ञेया ।

चन्द्रस्पष्टीकरण विचार:

वर्तमान नक्षत्रादारभ्य जन्मेष्टकालान्तं व्यतीत: समयो भयातमिति कथ्यते । नक्षत्रस्य सर्वभोग कालो भभोग इत्युच्यते ।

भयातभभोगानयन-ज्ञानम् -

यदि जन्मेष्टं ~~नक्षत्रं~~ नक्षत्रादधिकं स्यात्तदा इष्टकाले नक्षत्रं न्यूनीकार्यम् शेषो च द्वितीयादि नक्षत्रस्य घट्यादिकं संयोज्यम् । भयातं भवति । यदि चेष्टकालो नक्षत्रादधिको भवेत्तदा पूर्व दिन नक्षत्रं षाष्टि-घटिकाभ्यो हीन: कार्य: । शेषो च जन्मेष्ट काल घटी पलादिकं संयोज्यम् । भयातं भवति । भयातस्य पलादिकं षाष्टि

संख्यया गुणितां नक्षत्र संख्यां युञ्जीत तां संख्यां द्विभिर्गुणीकुर्यात् । ततश्च नवभिर्विभजेत् । लब्धांशादिकं चन्द्र स्पष्टो भवति ।

(घ) ग्रहाणां षाड्बल निरूपणम् :

ग्रहाणां षाड्वर्गवत् षाड्बलस्यापि महत्वं विद्यते । षाड्वर्गबली ग्रह एव बलवानिति जैमिनि सूत्रग्रन्थे सुप्रसिद्धम् । दृग्बलं, स्थान बलं, दिग्बलं काल बलं, निसर्ग बलं, चेष्टाबलमिति षाड्विधं बलं प्रोक्तम् ।

पूर्वं दृग्बलमाह । यश्च ग्रहो न्यग्रहं भावं वा पश्यति स द्रष्टेति कथ्यते । यश्चग्रहो भावो वान्येन ग्रहेण भावेन वाऽवलोक्यते सग्रहो भावो वा दृश्येति प्रोच्यते । दृष्टारं (ग्रहं भावं वा) दृश्यात् भावात् ग्रहाद् वा न्यूनीकुर्यात् । अत्र यदि शेषं षाडाश्यधिकं भवेत्तदा शेषं दशराशिभ्यो न्यूनीकृत्य तच्छेषमंशात्मकं विधाय द्विभिर्विभजेत् । लब्धिश्च दृष्टिस्पष्टो भवति । एवंच यद्यत्र द्रष्टुर्दृश्यश्चान्तरं पंचराश्यधिकन्तदा राशिं विहाय अंशादिकं द्विभिर्गुणीं कुर्यात् तच्च स्पष्ट दृष्टिर्भवति । यद्यत्रान्तरं राशि चतुष्टयाधिकं भवेत्तदा पंचराशिभ्यो न्यूनीकुर्यात् । शेषांशादिकं दृष्टिस्फुटमिति । यद्यत्रान्तरं राशि त्र्याधिकन्तदा राशिचतुष्टयात् न्यूनीकुर्यात् । शेषांशादिकमर्धं विधाय त्रिसंख्यायां युञ्जीत तदेव दृष्टि स्फुटं भवति । यद्यन्तरं राशि-द्वयाधिकं भवेत्तदा राशिं विहाय पंचदश संख्यायां युंजीत । तच्चापि दृष्टि स्पष्टमिति यद्यन्तरमत्र राश्येकाधिकन्तदा राशिं परित्यज्य अंशादिकं द्विभिर्विभजेत् लब्धिश्च स्पष्टं दृष्टिरिति भावः ।

अथ शनिदृष्टि-विशेषमाह -

अथ शनि दृष्टि विशेषं कथयन् पूर्वोक्त तस्यापवादमुप स्थापयति ।

अर्थादि यदि शनिश्च द्रष्टा भवति तदान्यो ग्रहो भावो वा दृश्यो भवति तदाऽनयोरन्तरे विहिते यत्र राशिस्थाने चैक संख्या शेषा भवति तदा ये भुक्तांशा भवेयुस्ते द्विगुणिता: कार्या: । अथ च यदि राशिस्थाने द्विसंख्या भवेत्तदा भुक्तांशानामर्धं विधाय षष्टि संख्याया न्यूनीकुर्यात् । एवंच राशिस्थाने षट् संख्या यामवशिष्टायां भुक्तांशान् त्रिंशत्संख्यायां युंजीतेति शनि दृष्टौ विशेष: ।

मंगलदृष्टौ विशेष माह - मंगलश्चेद् द्रष्टा स्यात्तदा तस्य दृश्यान्यूनी कृते राशि स्थाने संख्या त्रिसप्त वा भवेत्तदा भुक्तांशान् षष्टिसंख्याया न्यूनी कुर्यात् । यदि संख्या द्विशिष्टा स्यात्तदा भुक्तांशान् सार्द्धीकृत्य पंचदश संख्याया युञ्जीत । यदि च षट्-संख्या शिष्टा भवेत्तदा पूर्णं ६० बलं भवतीति विशेष: । शेषं पूर्ववदेवेति ज्ञेयम् ।

गुरुदृष्टौ विशेषमाह :- गुरुश्चेद् द्रष्टा तथा दृश्यान्न्यूनी कृते तस्मिन्नयदि त्रि सप्त वा भवेत्तदा युक्तांशानामर्द्धं पंच चत्वारिंशद् संख्यायां युञ्जीत । अथ च चत्वारि अष्ट वा संख्या शेषा स्यात्तदा भुक्तांशान षष्टि संख्याया न्युनीकुर्यात् । शेषं पूर्ववदिति भाव: । शनेस्तृतीये दशमे च पूर्णं दृष्टौ पंच चत्वारिंशद संख्या योगो, गुरोश्च नव पंचमीये दृष्टौ सति त्रिसंख्या योग:, भौमस्य चतुर्थाष्टम दृष्टौ सत्यां पंचदश संख्यायोगश्च पूर्वोक्त दृष्टि फले कार्य इति ज्ञेयम् ।

उच्च बलमाह:

स्पष्ट ग्रहे तस्य नीचांशादिकं हीनं कुर्यात् । शेषं यदि षड्राशिन्यूनं स्यात्तदा तस्यैवांशादिकं निमाय त्रिसंख्याया विभजेत् तच्चोच्च बलं ज्ञेयम् । अथ

च शेषं यदि षड्राश्यधिकं स्यात्तदा तच्च द्वादशराशि शोधितं कृत्वा तस्यांशादिकं त्रिसंख्यया विभक्तं चोच्चबलं भवतीति बोध्यम् ।

सप्तवर्गी बलमाह :

यदि ग्रहो मूल त्रिकोणस्तदा तस्य ४५ कलात्मक बलम् । स्वगृहस्थ स्चेत्तदा ३० कलात्मकं बलम् । अधिमित्रस्थस्तदा २० कलात्मकं बलम् । मित्रस्थस्य च १५ कलात्मकं समस्थस्य १० कलात्मकं शत्रुस्थस्य ४ कलात्ममधि शत्रुस्थस्य २ कलात्मकं बलंच क्रमशो बोध्यम् । अनेनात्र सूर्यः शनि गृहस्थः शनिश्च सूर्यस्य समौ तौ त्रास्य १० कलात्मकं बलमयातम् ।

युग्मायुग्म बलमाह - सूर्य भौम बुध गुरु शनयश्च पंचग्रहः विषम राशि स्था विषमनवांशीया भवेपुस्तदा पादमेकं पंचदश कलात्मकमिति बलं धारयन्ति । सम-राशीया समनवांशीयाश्च स्युस्तदा शून्य बलप्रदा भवन्ति ।

चन्द्रशुक्र्यो विशेषः । चन्द्र शुक्रौ तु समराशिस्थौ च पादमेकं पंचदश कलात्मकं बलं धारयतः । अन्यथा विषम राशि स्थौ विषमनवांशीयौ च भूत्वा शून्य बल प्रदौ भवत इति बोध्यम् ।

केन्द्रादि बलमाह -

केन्द्रस्थाः ग्रहाः पूर्ण ६० कलात्मकं पण फरस्था अर्द्ध ३० कलात्मकं आपोक्लिमस्था पाद मेवं १५ कलात्मकं बलं धरयन्तीति । केन्द्रस्थः पूर्णबलो मध्यबलः पण फरस्थित स्तद्वत् । आपोक्लिमगः प्रोक्तो हीन बलः खेचरो मुनि भिरिति ।

पुरुषग्रहा: सूर्य भौम गुरु: प्रथमद्रेष्काणे राशेरा च दशांशात्मके नपुंसकौ ग्रहौ शनि-बुधौ, द्वितीय द्रेष्काणे राशेरेकादशा दारभ्य विंशत्यंशात्मके स्त्री ग्रहौ- चन्द्र शुक्रौ तृतीय द्रेष्काजे राशे रेकविंशत्यंशादारभ्य त्रिशांशात्मिक पादमेकं पंचदश कलात्मकं बलं धारयत: । अन्यथा भिन्न द्रेष्काणेषुभाव: शून्य बल प्रदा ज्ञेया: ।

<u>दिग्बलमाह:-</u> सूर्य मंगलयो: स्पष्ट राश्यादिके चतुर्थ भाव स्पष्टं गुरु बुधयो: स्पष्ट राश्यादिके सप्तम भाव स्पष्टं, शुक्र चन्द्रयो: स्पष्ट राश्यादिके: दशमभाव स्पष्टं शनै: स्पष्ट राश्यादिके च लग्न स्पष्टं हीनं कुर्यात् । शेषं यदि षड्राश्याधिकं न स्यात्तस्यां शादिकं निमार्य त्रिभिर्विभजेत् लब्धं दिग्बलं भवति । षड्राश्यधिकश्चेत्तदा द्वादशराशितो विशोध्यांशादिकं निमार्य कलि त्रिभिर्वि भव ते दिग्बलं ज्ञेयमिति भाव: ।

<u>काल बालग्रह :</u>

अत्र पूर्वं नतोन्नतानुसारं ग्रहाणां बलं निरूप्यते । मध्याह्नादर्ध रात्र पर्यन्त मिष्ट कालश्चेत्तदा नतं कार्यम् । अर्धरात्रादारभ्य मध्याह्नान्त मिष्टकाले: स्यात्तदा नतस्योन्नतं कार्यम् । सूर्य गुरु शुक्रा: दिवा बलशालिन: । शनि चन्द्र भौमाश्च रात्रि बलशालिन: ।

उन्नतं द्विगुणितं रवि गुरु शुक्राणां दिवा बलं भवति तदेव बल षष्टि संख्याया न्यूनीकृत्य स्यात्तदा शेषं रात्रिबलं भवति ।

एवंच नतं द्विगुणितं शनि चन्द्र भौमाणां रात्रि बलं भवति षष्टि संख्याया न्यूनीकृतंच दिवाबलं ज्ञेयम् ।

बुधस्तु सदैव रात्रौ दिवा वा पूर्णं बली भवति ।

पक्ष बलमाह:

चन्द्रस्य स्पष्ट राश्यादिके सूर्यस्य स्पष्ट राश्यादिके हीने कृते शेषं यदि षड्राश्यधिकं भवेत्तदा तस्य द्वादश राशितो विशुद्धं चांशादिकं निमाय त्रिभिर्विभज्य च बलं ज्ञेयम् । शुभग्रहाश्चात्र चन्द्र बुध शुक्र गुरुश्च बोध्या: । शुभ ग्रहाणां बलस्य षष्टिसंख्याया हीनेकृते लब्धांशादिकं पापग्रहाणां सूर्य शनि भौमानां पक्ष बलं भवतीति ।

दिनरात्रि भाग बलमाह :-

अत्र दिनस्य रात्रेश्च भागत्रयं कुर्यात् । दिनस्य प्रथम भागे बुधो द्वितिय भागे सूर्यस्तृतीय भागे शनिश्च पूर्णं बलं ६० कलात्मकं धारयति । एवंच रात्रौ प्रथम भागे चन्द्रो द्वितिय भागे शुक्रस्तृतीय भागे भौम: पूर्णबलं ६० कलात्मकं धारयन्ति ।

अत्र गुरोर्विशेष: । गुरुश्च सदैव पूर्णं बलं ६० कलात्मकं विधत्ते ।

अत्र गुरुस्तु पूर्ववदाधाने त्रिंशत्कलात्मकं चित्प्रवेशे च चत्वारिंशत्कलात्मकं दिवा रात्रौ बलं विधत्ते ।

वर्ष मास दिन होरेश बलमाह :

वर्षपते: पादमेकं १५ कलात्मकं मासपतेश्चार्द्धम् ३० कलात्मकम्, दिनपते: पादोनं ४५ कलात्मकं होरापतेश्च पूर्णं बलं ६० कलात्मकं ज्ञेयम् । वर्ष मास दिन होरेण नाम नयन प्रकारस्तु सूर्य सिद्धान्तादि ग्रन्थेषु ज्ञेयम् ।

अयन बलमाह: -

अत्र अयन बल ज्ञानार्थं पूर्वं खण्डत्रयं ४५,३३,१२, इति बोध्यम् अयनांश युतस्य ग्रहस्पष्टस्य भुजं कुर्यात् । एवं यदि षड्राश्यधिकस्तु नवराशित: शोध्य: । नवराश्यधिकश्चैत्तदा द्वादश राशित: शोध्य: । एवं यदि षड्राश्यधिकतदा द्वादश राशित: शोध्य: । अथ च राशिस्थाने शून्यन्तदा ४५ ध्रुवांकेन गुणनीयम् । यदि च राशिस्थाने शून्यन्तदा ४५ ध्रुवांकेन गुणनीयम् । यदि च राशिस्थाने संख्यैका तदा ३३ संख्यया गुणीकृत्य ४५ संख्या योज्या । यदि भुजराशौ द्विसंख्या विद्यते तथा १२ संख्या गुणीकृत्य ३० संख्या विभजेत् । लब्धांशादिकै गतखण्डं योज्यम् । सूर्यस्य चानीतं बलमत्र द्विगुणीकृतमेवायन बलमिति बोध्यम् ।

भौमादिपंच ग्रहाणां मध्ये यदि ग्रहद्वयस्य अंशकालादिकं तुल्य तुल्यं स्यात्तदा तस्य ग्रहद्वयस्य युद्धं ज्ञेयम् । युध्यतो ग्रहयो: षड्बलैक्यस्यान्तरं कुर्यात् ।

अथ प्रसंग प्राप्त ग्रहाणां गति बल ज्ञानार्थं पूर्वं गतिभेदानाह अष्टौ भेदा ग्रह गतेश्च । तासां गतिनामिमानि नामानि (१) वक्रा (२) अनुवक्रा (३) विकला (४) समा (५) मन्दा (६) मन्दतरा (७) शीघ्रा (८) शीघ्रतरा क्रमेणैतासामित्थं बलं ज्ञेयम --

वक्रग्रहस्य ६०, अनुवक्रस्य ३०, विकलस्य १५, समस्य-३०, मन्दस्य -१५, मन्दतरस्य-७।३०, शीघ्रस्य ४५, अतिशीघ्रस्य च ३० इति ।

चेष्टा बलमाह :-

चेष्टा बल नयनार्थं पूर्वं मध्यम ग्रहस्य स्पष्ट ग्रहस्य अस्य मध्यम स्पष्टत्वं

ग्रहस्य ग्रहलाघवादिकरण ग्रन्थेषु ज्ञेयम् । चोभयोरन्तरं कुर्यात् । तस्यान्तरस्यार्धं कुर्वीत । अत्र यदि मध्यम ग्रह: स्पष्ट ग्रहादिकस्तदा तदन्तरं मध्यम ग्रहे युंजीत ।

सूर्य चन्द्रयोरत्र विशेष:- लब्धे सूर्य चन्द्रयोश्चेष्टा केन्द्रबले त्रिसंख्या विभागस्थाने त्रिराशि मेलनं कार्यम् । मध्यम स्पष्ट ग्रहयोपरन्तरस्यार्ध स्थाने मध्यम स्पष्ट ग्रहयोग - स्यद्धिमिति निर्दिष्टम् ।

मध्यमस्पष्ट ग्रहयोगस्यार्द्धं कृत्वा स्व स्व शीघ्रोच्चात् । हीनं कुर्यात् । तच्च भौमादिपंच ग्रहाणां चेष्टाकेन्द्र बलम् । यदि तच्च षड्राश्यधिकं स्यात्तदा द्वादश राशित: संशोध्यांशादिकं निमार्य त्रिभिर्वि भाजेत् । लब्धं चेष्टाबलं भवति । यदि षड् राश्यधिकं न स्यात्तदा तस्यैव चेष्टा केन्द्रबलस्यांशादिकं निमार्य त्रिभिर्वि भजेत् । लब्धं चेष्टाबलमिति भाव: ।

ग्रहाणा नैसर्गिक बलं सूर्यस्य ६०, चन्द्रस्य-५१, भौमस्य १७, बुधस्य २३, गुरो: ३४, शुक्रस्य ४३, शनैश्च ६ इतिज्ञेयम । काशी संस्करणे ।

षड्बलानयन प्रकारमाह -

अत्र पूर्वोक्त पंच विध बलैक्यं कुर्यात् । पुनश्च पापग्रह दृष्टि योगस्य शुभ ग्रह दृष्टि योगस्य चोभयोरन्तरं कार्यम् । पापग्रह दृष्टि योगाधिक्ये तस्यान्तरस्य चतुर्थांशं बलैक्ये न्यूनीकुर्यात् । शुभग्रह दृष्टि योगाधिक्ये चान्तरष्ट चतुर्थांश बलैक्ये पुंजीत तदेव षड्बलं भवतीति ज्ञेयम ।

अथ भावबला नयनमाह - यस्य भावस्य बल मानेयं स्यातस्य स्वामिन: पूर्वोक्तं बलैक्यं ग्रहणीत । तत्र शुभ ग्रह दृष्टे: पापग्रह दृष्टेश्चान्तारं कर्तव्यम् तत्र शुभ ग्रह दृष्टि बलाधिक्ये चान्तारस्य चतुर्थांश्च पुंजीत । पापग्रह दृष्टि बलाधिक्ये अन्तारस्य चतुर्थांशो हीन: कार्य: । लब्धं भावबलं ज्ञेयम् ।

यस्मिन् भावे गुरुर्बुधो वा स्यातत्र पूर्वोक्तानीत भाव बलमध्ये एकं योजयेत । शनिना भौमेन वा युतस्य भावस्य पूर्वोक्तभाव बलमेकेन हीनं कार्यम् ।

भाव विशेषे काल बलमाह :

दिवसे जन्मचेत्तदा शीर्षोदिया: मिथुन तुला सिंह कन्या वृश्चिक कुम्भाख्यो राशयो बलिनो भवन्ति । अन्य निर्बला इति । रात्रौ चेन्जन्म तदा पृष्ठोदया: मेष मेषा, वृषा, कर्क, मकर मकर, धनूंषि बलिनो न्ये निर्बला इति । सायं प्रात: सन्ध्याद्वयकाले जन्मचत्तदो भयोदयो मीनराशिर्बलवान् भवति । शेषा निर्बला इति भाव: ।

भावानां दिग्बलम् :

मिथुन तुला, कन्या धनु: पूर्वार्द्ध कुम्भ राशीनां लग्नानि यदि स्युस्तदा तत्र सप्तम भाव स्पष्टो हीन: कार्य: । शेषाश्च षड्राश्यधिके सति द्वादश राशित: संशोधनम् कुर्यात् । तस्य चांशादिक निर्माणं त्रिभिर्विभजेत । वल्धं दिग्बलं ज्ञेयम् । षड्राश्यधिकं न चेत्तदा तस्य द्वादाश राशित: संशोधनस्याभाव इति । एवमेव मकरस्य पूर्वार्द्धम धनुषश्चोत्तरार्द्धम् स्याक्या मेष सिंह वृष राशयो भवेपुस्तदा तत्र

चतुर्थ भावःस्पष्टो हीनः कार्यः । वृश्चिक कर्कौ चेत्तदा लग्नस्पष्टो हीनः कार्यः । मकरस्यो चेदाद्वै मीनराशिश्च स्याच्चदा दशमभाव स्पष्टो हीनो विधेयः । शेषा क्रिया पूर्ववद्विधेया । अथ च बलप्रकरण मुपसंहरन् ग्रहाणां षड् बलैक्ये सुबलित्वादि-भेदमाह -

सूर्यस्य ३९०, चन्द्रस्य ३६०, भौमस्य ३००, बुधस्य ४२०, गुरोः ३९०, शुक्रस्य ३३०, शनेश्च ३००, षड् बलैक्यांकाः, सुबलित्वे प्रोक्ताः । एभ्योन्केभ्यो यदि ग्रहाणामधिका अंकाः बलैक्ये भवेयुस्तदा ते पूर्ण बलिनो भवन्ति । यदि न्यूनाः स्युः तदा केवलं बलिन एव ज्ञेयाः । सूर्यादि ग्रहाणां षड् बलैक्ये सुबलित्व मुक्त्वा षड्बलस्य पृथक् पृथक् रूपेण ।

राजयोगादि योग कारकेषु ग्रहेषुयो ग्रहः स्वोच्चमूल त्रिकोणादिस्थस्तस्य बलत्वामुक्तम् । अर्थात् स्वगृहस्थोन्मूल त्रिकोणस्थ स्तमादुच्यस्थ इत्यादिकं निगदितं । पुनश्चापि षड्वर्ग, सप्तवर्ग, दशवर्ग, षोडषवर्गादिशुद्धो ग्रहो बलवानिति । परं षड् बलैक्य मितो बलवानिति ग्रहः सर्वोपरि बलवान भवतीति विशेषेण ज्ञेयम् ।

ग्रहाणामिष्ट कष्ट वर्णनन्तत्फल कथनंच :

ग्रहाणां भाव-दशाफलस्य शुभाशुभत्व ज्ञाना येष्ट कष्ट ज्ञान प्रकारं राशि साधनामाह —

इष्ट कष्ट ज्ञाने ग्रहाणामुच्चचेष्टा शुभाशुभ रश्मिज्ञानमावश्य कमतश्च पूर्व रश्मि साधनविधिर्निरूप्यते ।

ग्रहस्पष्टात् ग्रहस्य नीचांशादिकं हीनं कार्यम् । शेषं यदि षड्राश्यधिकं न भवेत्तदा तस्मिन्नेक संख्याया युक्तं विधायांशादिकं द्विगुणितम् कार्यम् । तदेव ग्रहस्योच्चरश्मिरिति । यदि शेषं षड्राश्यधिकं भवेत्तदा तद्द्वादश राशितः विशोधयेत् । ततश्च पूर्ववदेक संख्यया युक्तं कृत्वांशादिकं द्विगुणितं कार्यमिति भावः ।

षड्बल स्पष्ट प्रकरणे भौमादि पंचग्रहाणां चेष्टा केन्द्र ज्ञान प्रकार उक्तः । षड्राशितो न्यूने चैक संख्यायुक्तांशादिके द्विगुणिते चेष्टा रश्मिमस्पष्टो भवति । षड्राश्यधिकं स्यात्तदा द्वादश राशितः संशोध्यैक संख्यया संयुज्यांशादिके द्विगुणित चेष्टा रश्मिर्भवति ।

सूर्यचन्द्रयोरत्र विशेष :

सायने सूर्ये राशित्रयमेलनं कार्यम् । तदेव सूर्यस्य चेष्टा केन्द्रम् । सूर्यस्पष्टात् चन्द्रस्पष्टो हीनः कार्यः । तदेवचन्द्रस्य चेष्टाकेन्द्रम ।

इष्ट कष्ट बलानुसारं ग्रहाणां रश्मि स्पष्टमाह -

इष्ट कष्ट बलानुसारं रश्मि स्पष्ट ज्ञानार्थं पूर्व-रश्मि स्पष्ट मिष्टबलमाने-तुमिष्ट बलेन कष्ट बल मानेतुंच कष्ट बलेन गोमूत्रिका न्यायेन गुणयेत् । लब्धश्च इष्ट बल रश्मिस्पष्टः कष्ट बल रश्मि स्पष्टश्च भवति । इष्ट कष्ट रश्मि संयोग समुद्भवं फलं सम्यक् विचार्य ग्रहाणां शुभा शुभ फलं वाच्यम् ।

सूर्येष्ट बलम् ०।२८।२५ सूर्य रश्मिस्पष्टतः ५।४०।२३ गोमूत्रिकान्यायेन गुणितम् ००।०।१४०।११२०।६४४।१२५।१०००।५७५ षष्टि संख्यया विभक्ते २।४१।१२।

इदमेव सूर्यस्येष्ट बलं रश्मि स्पष्टश्च । इत्थमेव सूर्यस्य कष्ट बलम् ०।३१।३५ सूर्य रश्मिस्पष्टः, ५।४०।२३ गोमूत्रिका न्यायेन गुणितम् । ०।०।०।१५५।१२४०। ७१३।१७५।१४००।८०५ षाष्टिसंख्या विभक्तम् २।५६।१०, अयमेव सूर्यस्य कष्ट बलरश्मिस्पष्टः इत्यमेव सर्वत्र ज्ञेयम् ।

रश्मि संख्यानुसारं फलमाह -

एवं प्रागुक्त रीत्या संस्कृत रश्मय एकमारभ्य पंचसंख्यान्तं स्युस्तदा मनुष्यो दरिद्रो दुःखी च भवति । अपि च चोच्च कुले जातोपि नीचपुरुषाणां दासो जायते इति ज्ञेयम् । षट् संख्यातो दश पर्यन्तं रश्मयो भवेयुस्तदा जातको नरो निर्धनो दासो भारवाहकः स्त्री पुरुष हीनश्च जायते । एकादश संख्यासु स्वल्प प्रजो द्वादश रश्मिषु निर्धनो मूर्खश्च प्रोक्तः । त्रयोदशसु तु चौरश्चतुर्दशसु धनी कुटुम्ब पोषको धर्मरतः क्रोध हीनश्च भवति । पंचदशसु कुलदीपको धन विद्या युतश्च जायते ।

षोडशमारभ्य विंशति पर्यन्तं रश्मिषु बहुभृत्यः कुलपालकः कीर्तिमांश्च भवति । एकविंशति रश्मिषु पंचाशज्जन पालकः दानी दयालुश्च प्रोक्तः । द्वाविंशे रश्मौ लोभी कथितः । त्रयोविंशेरश्मौ जातिमुख्यो विद्या हीनो धनी सुखी च भवति ।

चतुर्विंशतिमारभ्य त्रिंशत्संख्यासु रश्मिषु लक्ष्मीवान् सर्व सत्वयुतो राज प्रियः प्रतापी बहुजन वृतो निगादितः ।एकत्रिंश रश्मौ सचिवो द्वात्रिंशे तु सेनानायको भवति।

सन्तति विचारमुक्त्वा सामान्य विचारमाह -

द्वात्रिंशद्रश्मितः पंच चत्वारिंशद्रश्मिं यावत् संख्यया तदनुपातेनैव आपंचाशत सहस्त्रान्तं संख्यकानां जनानां पालको राजा व भवति । रश्मि संख्यानुसारं राजयोगमाह ४१ रश्मिषु चैकदेशस्य, ४२ रश्मिषु जनपदद्वयस्य, ४५ रश्मिषु राज्यत्रयस्य ४४ रश्मिषु राज्यचतुष्टयस्य, ४५ रश्मिषु जनपदपंचकस्य, ४६ रश्मिषु राज्य षाट्कस्य ४७ रश्मिषु जनपद सप्तकस्य च क्रमशो धिपतिजायते । ४८, ४९, ५० रश्मिषु सार्वभौमो भवति । पंचाशद्रश्मित ऊर्ध्वमिन्द्रतुल्यो जायते ।उच्च रश्मि-स्पष्टस्य योगं कृत्वार्धं कुर्यात् । तेनार्द्धेन चोच्चचेष्ट रश्मियोगं गोमूत्रिका न्यायेन गुणयेत् । षष्टि संख्यया च विभजेत् । लब्धमश्वगज गोमनुष्यादिकानां पोष्याणां संख्या भवति । अत्र कलियुगमाश्रित्य राजयोगादिषु विशेषमाह -

अत्र ये राजयोगा उक्ताः सन्ति ते कलियुगे शूद्राणां म्लेच्छ धर्मिणां यवनादीनांच कृते ज्ञेया न तु ब्राह्मणानांकृते सन्ति । यदीमे योगा विप्राणां जन्मकाले स्युस्तदा न ते राजानो भवन्ति । अपि तु सौभाग्य युक्ताः श्रीमन्तो यज्ञ याग क्रिया परायणाः भवन्ति ।

अत्र मूलपाठे क्षत्रिय वैश्य योनोल्लेखः तेनात्र टीका कारेण विशेषो निर्दिष्टः ।यत्कलियुगे क्षत्रिय वैश्ययो राज्यसत्ता निर्वाह कला मात्रो भवितः ।

अतश्च केवलं कलियुगे शूद्रादयो म्लेच्छाश्च राजधर्मपरा इति स्पष्टमेव ।

अत्र रश्मिफलस्य विशेषमाह -

पूर्वं ये राज योगाः नाभसयोगा श्चोक्ता तास्ते रश्मि योगेनैव फलप्रदा भवन्ति।

इत्थं बोध्यं यद्राजयोगादिकेषु रश्मियोगे च सति पूर्वं राजयोगादीनां शुभं फलं वाच्यम् अन्यथा रश्मियोगाद्भावेन पूर्णं फलमिति भावः ।

भाग्य कर्म फले पि रश्मिफलवैशिष्ट्या माह -

भाग्यभाव फलं कर्म भावफलंच यत्पूर्वमुक्तं तत्रापि रश्मियोगानुसारगतुपातेन शुभाशुभ फलं वाच्यम् । अथ सप्तबलानुसारं पृथक् पृथक् बले सति पृथक् पृथक् फलमाह -

स्थानबलस्याधिक्ये ये मनुष्यो देश मुख्यो दिग्बलाधिक्ये विजयी चेष्टा बलाधिक्ये प्रभुता युक्तः काल बलाधिक्ये कार्यकुशलः । अयनबलाधिक्ये च सदोत्साही भवति । स्वंचोच्चोच्च बलाधिक्ये वंश मुख्यो । नैसर्गिक बलमाधिक्ये स्वजाति धर्मपरश्च जायते इति विशेषः ।

५० संख्यात ऊर्ध्वं रश्मिषु क्षत्रियश्चेत्तदा, राजा, चक्रवर्ती वैश्यश्चेत्तदा राजा । शूद्रश्चेत्तदा धनवान्, ब्राह्मणश्च विद्वान यज्ञ परायणो भवति ।

ग्रहाणामवस्था निरूपणम् तन्दनुरूपं द्वादश भाव फलकथनंच - ज्योतिष शास्त्रे ग्रहाणां विविध प्रकारेण व - स्थानां विवरणमुपलभ्यते तत्तन्मतानुसार-
ण ग्रहाणां फल कथनेपि विशेषो दृश्यते । अत्र तासां दशानां षाण्णवति संख्यका भेदाः प्रोक्ताः सन्ति ।

उच्चस्थो ग्रहो जाग्रत, मित्रस्थः समस्थोवा ग्रहः स्वप्नस्तथा । शत्रु राशिस्थो नीचो वा सुषुप्ति तद्यति प्रतिपादितम् । अस्य स्वरूपस्यान्यत्र चोल्लेखा भावात् युक्ति युक्त तत्वं न प्रतीयते ।

तत्र फलमाह -

जाग्रत्स्थो ग्रह: पूर्णफलदायक:, स्वप्नस्थश्च मध्यमफल प्रद:, सुषुप्ति चश्च निष्फल इति बोध्यम् ।

दीप्ताद्यवस्थामाह -

इयमवस्था नवधाप्रोक्ता । दीप्त, स्वस्थ पमुदित, शान्त,दीन दु:खित विकल खल कोपीति नवभेदा ग्रहस्य ।

उच्चस्थो दीप्त: स्वगृहस्थ: स्वस्थ:, अधिमित्रास्थो मुदित:, मित्रस्थ: शान्त:, समगृहस्थो दीन:, शत्रुस्थो दु:खित:, पापस्थो विकल:, खल ग्रह राशिस्थ: खल: । अस्तंगत: कोपी । इति लक्षणानि ज्ञेयामि ।

राज्योत्साहैश्वर्यं धनवाहन स्त्री पुत्रादि सुखं राजसम्मानंच दीप्तगृहस्य दशाकाले भवति । आरोग्यधन विद्यायश: प्रीति स्त्री पुत्र धर्मादिक सुखं स्वस्थस्य फलं कथितम् ।

वस्त्र सुगन्ध पुत्र धनैश्वर्यं पुराण श्रवण धर्म वाहना भरणादिक सुखं मुदितस्य फलं प्रोक्तम् । सुखधर्म स्त्री पुत्र वाहनादिकं शास्त्र चिन्तन राजसम्मानंच शान्तस्य फलं ज्ञेयम् । स्थान भ्रंश बन्धु विरोध कुत्सित वृत्ति जीवन बन्धु जन परित्याग रोग पीडादिकंच दीनस्य फलं निगदितम् । विविध कष्ट विदेश भ्रमण बन्धु वियोग चौराग्नि राजभयादिकंच दु:खितस्य फलं कथितम् । वैकल्य मनोविकार मित्रादिक मरण स्त्री पुत्र वाहनादिक पीड़ा चौरभयंच विकलस्य फलं प्रोक्तम् ।

कलह पितृ वियोग शत्रुकृत धननाश स्वजन कृत निन्दा दिकंच खलस्य परिणामो ज्ञेय: । पापकर्म-प्रवृत्ति:, विद्या धन स्त्री पुत्र बंधु नाशो नेत्र रोगश्च कोपान्वितस्य ग्रहस्य दशा काले फलमिति ज्ञेयम् ।

ग्रहाणां बालकुमार युवा वृद्धामृताख्या: पंचावस्था भेदा: । विषमराशिषु षाडंशपर्यन्तं प्रतिराशि बालादिक्रमेण पंचावस्था ज्ञेया । समराशिषु वैपरीत्यक्रमेण मृताद्यवस्था ज्ञेया: ।

षड्भेदाश्चात्र ग्रहस्यैतदवस्थानुरूपा: । लज्जित गर्वित क्षुधित तृषित, मुदित, क्षोभित भेदेन । पंचमभावस्थो राहुणा केतुना वायुतो ग्रहो लज्जित: । उच्चस्थो मूल त्रिकोणस्थो वा गर्वित: शत्रुणा युतो दृष्टो वा शनि युतश्च क्षुधित: जलराशिस्थ: शत्रुणा दृष्ट: शुभग्रह दृष्टि शून्यश्च तृषित:, मित्रस्थो मित्रेण युतो दृष्टो वा गुरुणा युतश्चापि मुदित:, सूर्येण युत: पापै: शत्रुणा वा दृष्टश्च क्षोभितो ग्रह इति विज्ञेयम् । यस्मिन् भावे क्षुधित: क्षोभितो वा ग्रहस्तिष्ठति तद्भवस्य नाशो विज्ञेय: । अत्र ग्रहाणां बलाबल विचारानुसारमैव फलं वाच्यम् । मिश्र ग्रहेषु मिश्रमैव फलमिति । यथा हि दशमस्थाने यदि लज्जित: क्षुधित:, क्षोभितस्तृषितो वा ग्रहस्तिष्ठेत्तदा पुत्रनाश: । एवं सप्तमस्थे स्त्रीनाश: इति बोध्यम् । नवगृहारामसुखं राज्यं कला पाण्डित्यं धनलाभो व्यवहारवृद्धिश्चेति गर्वितस्य ग्रहस्य दशायां फलं भवति । गृह वस्त्र भूषण स्त्री बन्धु प्रीत्यादि सुखं राजगृहवासो बुद्धि विद्या प्रकाश: शत्रु नाशश्चेति मुदित ग्रहदशा फलम् । ईश्वरे श्रद्धा बुद्धिनाश: सर्व सन्ततिपीडा कलहे रुचिर्धर्मे रुचिर्वृथा भ्रमणंचेति लज्जितस्य फलम् । दारिद्र्य कुबुद्धि कष्ट धन नाश पाद पीडादिकं राजकोपेन पाक: कथित: । शोक मोह शरीर व्यथा शत्रु कलह धननाश परिजन सन्ताप विषाद बुद्धिनाशादिकश्चेति क्षुधितस्य परिणाम: । स्त्री रोग कुकर्म प्रवृत्ति निज जन परिवारवादाज्जननाशो मान हानि: कृशत्वं दुष्टकृत परितापश्चेति तृषित ग्रह दशायां परिपाको भवति ।

शयनुमुपवेशनं नेत्रपाणि: प्रकाशनं, गमनमगमनं सभावासं आगमनं नृत्यलिप्सा कौतुकं निद्राचेति द्वादशवस्थानुसारेण ग्रहचेष्टा नामानि बोध्यानि ।

तत्रादौ सूर्यं फलम् --

शयनस्थे- मन्दाग्निरोग: पादस्थौल्य भगन्दर हृदयशूल पित्त प्रकोपादि रोगाणामुत्पत्तिर्भवति । उपवेशनस्थे- दरिद्रो भारवाहको विवादी कठोर चित्तो धननाशकरश्च जातको भवति । नेत्रपाणिस्थे- विवेकी परोपकारी धन बल सुख युतो राजप्रियश्च जायते । प्रकाशनस्थे- धन धान्य रूप युत उदारचित्तो बहुपुण्यकर्ता, सभासु वक्ता भवति । गमनस्थे- प्रवासी, दु:खितोऽलसो धन बुद्धिहीन: क्रोधी भयातुरश्च जायते । आगमनस्थे- परस्त्रीरत: परिजन रहितो गमनशील:, खलोमलिन: कृपण:, कुबुद्धिश्च प्रोक्त: । सभास्थे- परोपकारी धनधान्य गुणान्वितो भूमि नव-वस्त्र गृहयुतो महाबली, मित्रवत्सल:, कृपाकलाधरश्च निगदित: । आगमस्थे- शत्रुगण जोभित:, कृश: खलश्चञ्चलो धर्म कर्म हीनश्च प्रोक्त: । भोजनस्थे- पीडित तनु: परदारहृतधनो, मिथ्यावादी शिरोव्यथायुत: कदन्नभोजी कुमार्ग रतश्च भवति । नृत्यलिप्सास्थे- विद्वत्पूजित: काव्यविद्या विशारद:, राजपूज्य:, पाण्डितश्च भवति ।

कौतुकस्थे- सदानन्दयुतो ज्ञानी यज्ञकर्ता राजभवनाश्रित:, शत्रुभीत: सुमुख: काव्यानुशील-कश्च कथित: ।

निद्रास्थे- निद्रित: प्रवासी, नष्टदारो नष्टधनश्च निगदित: ।चन्द्रस्य फलं। चन्द्रे शयनस्थे- मानी कामी धनविनाशक: शीतप्रधानश्च प्रोक्त: ।

उपवेशनस्थे , रोगी, मन्दबुद्धि:, कठोरचित्त:, कुकर्मकृत्चौरश्च विज्ञेय: ।

नेत्रपाणिस्थे- महारोगी, धूर्त: , कुकर्मी बहुजल्पकश्च बोध्य: ।

प्रकाशनस्थे- नृपाङ्गन प्राप्ति:, तीर्थगमनं, ख्याति:, हस्तिगजवाहनादिक सुखं, स्त्री-भूषणैश्वर्य लाभश्च निगदित:

गमनस्थे – कृष्ण पक्षीये च क्रूरः सदा नेत्र रोगी । शुक्ल पक्षे च विशेषेण भयातुरो भवति ।

आगमनस्थे– मानी पादरोगी प्रच्छन्नपापकृद् दीनो सन्तुष्टश्च विज्ञेयः ।

सभास्थे– राजमान्यः सर्वश्रेष्ठोऽति सुन्दरः कामिनीनां सन्तोषकरः सर्वप्रियो गुणज्ञश्च जायते ।

आगमस्थे– वक्ता धर्म निष्ठश्च भवति । कृष्णपक्षीयेसति चन्द्रे द्विभार्यो रोगी हठी दुष्टश्च जायते इति विशेषः ।

नृत्यलिप्सास्थे– शुक्ल पक्षीये संगीतज्ञो रसज्ञश्च कथितः कृष्णपक्षीये तु पापीयान् भवति । भोजनस्थे– शुक्ल पक्षीये मान यानु जनता वनिता पुत्रैश्वर्यादिक सुखयुतो भवति । कौतुकस्थे– राजा व धनयुतः काम कला प्रवीणो वेश्या रतिरमण कुशलश्च प्रोक्तः । निद्रास्थे– गुरु युतेचन्द्रे प्रतिष्ठावान् भवति गुरु युतिरहिते क्षीणे च चन्द्रे साक्ते धनस्य भार्यायाश्च नाशः शृगालरुदनयुतं गृहंचतस्य भवति ।

बुधफलमाह – शयनस्थे– बुधे लग्ने च विशेषेण रक्तनेत्रः क्षुधातुरः खंजश्च प्रोक्तः । लग्नादन्य भावेषु च बुधे लम्पटो धूर्तश्च दृश्यते । उपवेशनस्थे लग्ने च विशेषेण गुणी भवति पाप दुष्टे युते वा बुधे दरिद्रो ज्ञेयः । शुभ युते दृष्टे वा धनी कथितः । नेत्रपाणिस्थे– विद्याविवेक हीनो मानी हित सन्तोष रहितश्च निगदितः । पंचम भावस्थे नेत्र पाणिगते सति तु स्त्री पुत्र वियुक्तो नृपाद्धन प्राप्ति युतः कन्या प्रजश्च ज्ञेयः ।

प्रकाशस्थे– दानी दयालुः पुण्यात्मा विविध विद्या निपुणो विवेकी दुष्टहन्ता च प्रोक्तः।

गमनस्थे– राजभवन गमनागमन रतो लक्ष्य युतश्च भवति ।

आगमनस्थे– पूर्वोक्त गमनस्थवत्फलं ज्ञेयम् ।

सभास्थे– उच्चराशिस्थे तु विशेषेण धनी, मानी राजा वा राजमन्त्री पुण्यात्मा प्रभुभक्तो मुक्तश्च भवति ।

आगमस्थे - नीचसेवया धनं प्राप्नोति, पुत्र-द्वयन्तथा चैका प्रतिष्ठा दायिनी कन्या चास्य भवति ।

भोजनस्थे वादविवादेन धनहानिस्तथा राजभयं शरीरे दौर्बल्यं मनासि चांचल्यं धनस्त्री सुखनाशश्च भवति ।

नृत्यलिप्सास्थे- मानी, प्रतापी पण्डितो रत्नपुत्र मित्रैश्वर्यवाहनादिक सुखयुतो भवति । पापराशिस्थो बुधश्चेत्तदा वेश्यारतो लम्पटश्च प्रोक्त: ।

कौतुकस्थे- लग्नतो चापि संगीतज्ञो भवति । सप्तमे ऋष्टमे वा स्थितो वेश्यारतो नामे च पुण्य बुद्धियुतो निगदित: ।

निद्रास्थे - सदाव्याधियुक्तो निद्रासुख हीनो अति सन्ताप युतो निज जनैर्विवादरतो धनमान रहितश्च भवति ।

गुरु फलमाह-गुरौ -

शयनस्थे- बलशाली दीर्घ हनु: शत्रुभय युतो ति गौरशरीरो हीन रवश्च प्रोक्त: । उपवेशनस्थे- वक्तातिगर्वी राजशत्रुजन तप्त: पाद जंघा मुखादिकेषु व्रण युतश्च जायते ।

नेत्रपाणिस्थे- रोगी गीतनृत्य प्रिय: कामी गौरवर्णो न्यजन प्रीतियुक्तो अत्यंत धनहीनश्च भवति । प्रकाशस्थे- गुणानामान्वयुत: सुनीतेजस्वी वृन्दावनगामी च भवति । उच्चस्थे गुरौ तु लोकमान्यो कुबेर सदृश धन युतश्च प्रोक्त: ।

गमनास्थे- साहसी मित्रवर्गयुत: पण्डितो वेदज्ञो विविधैश्वर्य युतश्च कथित: ।

आगमनस्थे- सदा परिजनयुत: सुन्दर भार्या लक्ष्मी युतश्च निगदित: ।

सभास्थे- मुक्तामाणिक्य गजाश्व रथनाहनादि कैश्वर्य युतो विविध विद्या प्रवीणश्च प्रोक्त: आगमस्थे विविध वाहन स्वर्ण स्त्री पुत्र भृत्य मित्रादि सुखसम्पन्नो राजतुल्य: सुबुद्धि: श्रेष्ठ विद्या गर्वित: काव्यरत: सुमार्गी सर्वत्र मान्युतश्च निगदित: ।

भोजनस्थे- सदा गजाश्ववाहन सुभोजनैश्वर्य युतो विज्ञेय: ।

नृत्यलिप्सास्थे राजमान्यो धनी, धर्मात्मा तन्त्रज्ञ: पण्डित पूज्य: शब्द शास्त्रज्ञश्च कथित: ।

कौतुकस्थे- कुतूहली, महाधनी, सुखी, कुलप्रतापी, कृपालभूमिपुत्र नीतियुतो महाबली राज पण्डितश्च भवति ।

निद्रास्थे मूर्खो दरिद्र: पुण्यहीनश्च प्रोक्त: ।

शुक्रफलमाह :-

शयनस्थे:- बली, दन्तरोगी, क्रोधी, धनहीनो वेश्यारतश्च भवति ।

सपवेशनस्थे- सुवर्णरत्न धनैश्वर्य राज-सम्मानादिक सुख युतो शत्रुहन्ता च जायते ।

नेत्रपाणिस्थे- लग्ने सप्तमे दशमे च विशेषेण धनहानिस्तथा स्थानान्तरे वो कमगृह्युतो भवति । प्रकाशस्थे- सर्वोच्च मित्र गृहादिस्थे च मदोन्मत्त गजबलशाली राजतुल्यो धनी सुखी काव्य संगीतज्ञश्च प्रोक्त: ।

गमनस्थे- मातृनाश: मानसी व्यथा, बन्धु वियोग: शत्रुभयश्च भवति ।

आगमनस्थे- धन स्त्री पुत्र, जनादिक सुख रहित: शत्रु भीतो रोगी च भवति ।

भोजनस्थे- क्षुधातुरो रोगी शत्रु पीडितश्च भवति । अत्र कन्या राशिस्थे तु विशेषेण महाधनी पण्डितश्च प्रोक्त: ।

नृत्यलिप्सास्थे- कविर्बुद्धिमान् वीणामृदंगादिक वाद्य वादनरतो धनवृद्धिकरश्च ज्ञेय: ।

कौतुकस्थे- इन्द्रतुल्य बलशाली सभाचतुर: सदालक्ष्मीयुतश्च भवति निद्रास्थे परसेवारत: पर निन्दाशीलो वीरो वाचाल: सदा भूमि भ्रमण रतश्च प्रोक्ता ।

शनिफलम् -

शयनस्थे- क्षुत्पिपासातुर: प्रथमे वयसि रोगी परतश्च महाभाग्य युतो भवति ।
उपवेशनस्थे- शत्रुपीडितो दद्रुरोग युतो भिमानी राजदण्डितो वव्यपी च प्रोक्त: ।
नेत्रपाणिस्थे सुन्दर स्त्री युतो मित्रोपकृतो बहुकलाज्ञ: प्रियवक्ता च कथित: ।

प्रकाशनस्थे- विविधगुण धन बुद्धि युतस्तेजस्वी दयालु: प्रभुभक्तश्च जायते ।
गमनस्थे- महाधनी, पुत्रवान् राजपण्डितो व्ययी शत्रुभूमिहारी च भवति । आगमस्थे-
पद रोग भययुत: स चनोचितो स्त्री पुत्र सुख हीनो दीनो निराश्रितो भ्रमणशीलश्च
कथित: । सभास्थे सुवर्ण धन रत्न युतो नीतिशीलस्तेजस्वी पूर्णसुखी च निगदित: ।
आगमस्थे- विविध रोगाक्रान्तो मन्दगतिको नृप धन याचना रहितश्च भवति ।
भोजनस्थे- सरस भोजन प्राप्ति: नयनयोर्मन्दज्योतिर्मोहतापित बुद्धिश्च जातकस्य कथिता।
नृत्य लिप्सास्थे- धर्मात्मा धनी राजमान्यो धीरो योद्धा च भवति । कौतुकस्थे सुन्दर
स्त्री भूमि धनैश्वर्य सुख रत: काव्य कला निपुणो अति सुखी च प्रोक्त: ।

निद्रास्थे- धन गुण पराक्रम युत: शत्रुहन्ता वेश्यारतश्चकथित: ।

राहुफलम् -

शयनस्थे क्लेशाधिक्यं प्रोक्तं । अत्र वृषभ मिथुन कन्या मेषेषु राशिषु
च स्थिते तु धनधान्य सम्पन्नो भवति । उपवेशनस्थे मानी राजमान्योपि धनहीनोदद्रु-
रोगयुतश्च प्रोक्त: । नेत्रपाणिस्थे- दुष्ट शु शत्रु सर्प चोरेभ्यो भयं नेत्ररोगो धननाशश्च
कथित: । प्रकाशनस्थे- शुभासनस्थिति: सुयशो धनगुणैश्वर्योन्नितिर्नवमेधाकृतिर्नृपाधिका-
रित्वं विदेशे उन्नतिश्च प्रोक्ता । गमनस्थे- बहुप्रज: पण्डितो धनी मानी राजपूज्यश्च
कथित: । आगमनस्थे- क्रोधी बुद्धि धनहीन: कामी कृपण: कुटिलश्च जातको भवति ।
सभास्थे- पण्डित: कृपणो विविध गुणायुतो धनी च भवति ।

आगमस्थे- व्याकुलता, शत्रुभयं, बन्धुविवादी, धनजननाश: शठता कृशता च दृश्यते ।
भोजनस्थे- मन्दबुद्धिरलस: स्त्री पुत्र सुख हीन: भोजन दु:ख विकलश्च जातको भवति ।
नृत्यलिप्सास्थे- महाव्याधियुतो नेत्र रोगी शत्रुभीतो धनधर्महीनश्च भवति ।
कौतुकस्थे- परदाररतश्चौर: स्थान भ्रष्टश्च कथित: ।
निद्रास्थे- स्त्री पुत्र गुणैश्वर्यादिक सुखयुतो गर्वितो महाधनी च भवति ।

केतुफलमाह :

शयनस्थे- मेष वृष मिथुन कन्या राशिषु च स्थिते जातको धनवान भवति । अन्य राशिषु स्थिते तु रोकाक्रान्त: कथित: । उपवेशनस्थे- दद्रुकण्डुरोग शत्रु सर्प चौरेभ्यो भयं प्रोक्तम् । नेत्रपाणिस्थे नेत्ररोग दुष्ट सर्प सत्रूणांच भयं दृश्यते । प्रकाशनस्थे- धनी धर्मात्मा, नित्य प्रवासी सात्विको, राजसेवक उत्साही च प्रोक्त: । गमनस्थे बहु पुत्रो महाधनी पण्डितो गुणवान् दाता च भवति ।
आगमनस्थे- विविध रोग युत: प पिशुन: परनिन्दको दन्तरोगी धनहानि करश्च दृश्यते । सभास्थे- वक्ता गर्वित: कृपणो लम्पटो धूर्तश्च भवति । आगमस्थे- पापिनाग्रणी-बन्धुजन विवादी दुष्ट: शत्रुरोग पीडितश्च निग/दित: भोजनस्थे- सदा क्षुधातुरो रोगी दरिद्रो भ्रमणशीलश्च भवति । नृत्यलिप्सास्थे- व्याधि पीडितो धूर्तो नर्थकारी बुद् बुदाक्षो दुराधर्षश्च प्रोक्त: । कौतुकस्थे- स्थान भ्रष्ट- परदारतश्चौरश्च निगदित: निद्रास्थे- धन धान्य गुणैश्वर्ययुतो धीर: स्त्री पुत्र युतो गर्वितो महाधनी च भवति । अथ अत्रावस्थानुसारेण पृथक् पृथक् भावानुरूपो फल विशेषो पि निरूपित: । शयनावस्थायां यत्र कुत्र भावेषु स्थितो शुभ ग्रहस्तद् भाववृद्धिं करोति । भोजनावस्थायांच यत्र कुत्रापि स्थित: पाप ग्रहस्ततद्भाव हानिं विधत्ते । निद्रावस्थायांच सप्तमस्थ: पापग्रह: शुभ फलप्रद:, स यदि पापदृष्टो न भवेत् । पंचमस्थो निद्रायां शयने च निश्चयेन शुभ फलकरो भवति । परंच शयनावस्थायां निद्रावस्थायां वा यदि चाष्टमस्थ:

पापग्रहस्तदा राजदण्डादिनाप मृत्यु योग: । यदि चात्र शुभ ग्रहस्य योगो दृहष्टिर्वा स्याचदागांदितीर्थे मृत्यु योगो ज्ञेय: । दशमे भावे कौतुकावस्थायां प्रकाशावस्थायां वा चन्द्रे राजयोगो ध्रुवो ज्ञेय: । एवं बलाबलानुरूपं सर्वत्र फलं वाच्यमिति भाव: ।

अप्रकाशक ग्रहाणां निरूपणम् स्पष्टीकरणंच :

प्रथमं धूममाह - जन्मकालीय सूर्यस्पष्टराश्यंशादिके राशि चतुष्टयस्यांशानां त्रयोदशस्य विंशति कलानां च योगे धूमनामकस्याद प्रकाशक ग्रहस्य स्पष्टो भवति । तथाहि कल्पित सूर्य स्पष्ट: २।४।२८।१ अत्र ४।१३।२० योगे ६।१७।४८।१ धूमस्पष्ट: ।

व्यतिपात स्पष्ट प्रकारमाह -

द्वादश राशितो न्यूनो धूम एव व्यतिपातो भवति । तथाहि १२।०।०।० धूम ६।१७।४८।१ न्यूनीकृते ५।१२।११।५९ व्यतिपात:स्पष्ट: । अस्यैवापरं नाम पात इति ज्ञेयम् । व्यतिपातस्पष्टे षड् राशियोगे परिवेषस्फुटत्वं भवति । अत्र हि व्यतिपात: ५।१२।११।५९ तत्र ६।०।०।० षड्राशियोगे ११।१२।११।५९ परिवेष स्पष्ट: ।

इन्द्रचाप स्फुट प्रकारमाह -

अस्यैवापरं चापइति कथ्यते । परिवेषस्फुटस्य द्वादश राशितो न्यूनीकरणे चाप स्फुटत्वम् । अब हि ११।१२।११।५९ परिवेष: १२।०।०।० द्वादश राशितो न्यूनीकृते ०।१७।४८।१ इन्द्रचापस्पष्ट: । ध्वजमाह अस्यैवापरं नाम केतुरिति-इन्द्र चाप-स्पष्टे षोडशांशांमा चत्वारिंशत्कलानां च योगे केतु स्फुटत्वम् । अत्रहि ०।१७।४८।१ चापे ०।१६।४०।० अंशकलादि योगे १।४।२८।१ केतु स्पष्ट: ।

गुलिक :

जैमिनीय सूत्रे गुलिकस्य व्यापकरूपेण चर्चा दृश्यते । न केष्वन्ये ग्रन्थे एतादृशी चर्चा वर्तते इति तस्य मौलिकत्वमेव ।

गुलिको नायं शुभग्रह: । अस्य योगे नैवाधानलग्नस्य स्फुटत्वं भवति चच्चाधान लग्न स्वरूपे द्रष्टव्यम् । अन्यत्रापि फल कथन प्रकारे गुलिक योगेन ग्रहाणां शुभाशुभ योगो भवति । यथा जैमिनीय सूत्रे - 'स गुलिके विषदो विषहतो वा'[13] राहु गुलिकाभ्यां क्षुद्रविषाणि[14] अर्थात् गुलिक युते कारकांशे विषदाता विषेण वा हतो भवति । एवमाजीविका निश्चये प्यस्य महत्वम् । जन्मकाल इष्टनिश्चयार्थं मप्यस्य प्रयोगो भवति ।

यस्मिन् दिने गुलिक ज्ञानस्यावश्यकता भवेदिति तद्दारेशात अर्थात् रविवासरे सूर्यात्सोमवासरे चन्द्रादिति दिनस्य सप्तभागा: क्रमश: सूर्यादि ग्रहाणामधिपतयो भवन्ति । अष्टमश्च भाग: स्वामि विहीन: । यस्य भागस्याधिपति: शनि: स एव भागो गुलिक संज्ञको ज्ञेय: ।

रात्रौ गुलिक नयन प्रकार:

रात्रौ रात्रिमानमष्टधा विभज्य वारेशान्य पंचभागमारभ्य क्रमात्सूर्यादि ग्रहाणां भागा ज्ञेया इति रात्रौ विशेष: । अत्राप्यष्टमो भाग: स्वामिहीनस्तथा शनिभाग एव गुलिक इति पूर्व वत् बोध्यम् । अत्र अन्य ग्रहाणां नामकरणे पि विशेषमाह -

शनि भागो गुलिक एवमत्र सूर्य भागस्य कालवेला भौमभागस्य मृत्यु: बुध भागस्य चार्द्ध प्रहरो द्वियाम इति वा गुरु भागस्य यमघण्ट इति नामानि ज्ञेयानि ।

यतो त्र न कश्चिदुल्लेखो-उतश्चन्द्रशुक्रौ नामहीनौ ज्ञेयौ । कल्पितोदाहरणे द्वात्रिंशद्-घटिकादिकं दिनमानं सूर्यश्च वासरस्तत्राष्टधा विभागे घटिका चतुष्टयं प्रत्येकस्य भाग: । सूर्यादारभ्य प्रथमो भाग: कालवेला । द्वितीयश्चन्द्रस्य भागस्तस्य नामान्तराभाव: । तृतीयो भागो भौमस्य तस्य मृत्युर्नाम । चतुर्थस्य बुध भागस्य चार्द्धयाम इति । पंचमस्य गुरु भागस्य यमघण्टइति । षाष्ठस्य च शुक्रभागस्यापि नामन्तराभाव: । सप्तमस्य च शनि भागस्य गुलिक इति नाम । अष्टम भागस्य न कोऽपि स्वामीति नामाभाव: इति स्पष्टम् ।[१५]

~~३-६~~ घटिकां चतुर्भिर्गुणीकुर्यात् । पलानि च यदि पंचदशाधिकानि भवेयुस्तदा पंचदशभिर्विभजेत् । लब्धं चतुर्गुणितासु घटिकासु युंजीत । ततश्च ~~द्वादशभिर्विभजेत्~~ द्वादशभिर्विभजेत् । शेषं प्राणपदं स्मृतम् । पंचदश ~~संख्या~~ संख्यया विभक्त शेष पलानि द्वाभ्यां ~~गुणी~~ गुणी कुर्यात् लब्धं चांशात्मकं भवति ।

कल्पितोदाहरणम् यथा -

इष्टं ५३।७।३०

अत्र ५३ घटिका ४ गुणिता २१२ पलानि ७।३० पंचदशभ्यो ल्पानि अतो त्र प्राण पदाभाव: । २१२ द्वादशभि: १२ विभक्ता शेषं ८ एतदेव प्राण ~~पद०~~ पदं । ७।३० पलानि द्वाभ्यां, गुणितानि १५ स्तैरंशा इति बोध्यम् ।

अत्र यदि जन्मलग्ने सूर्य राशिश्चर: स्यात्तदा तस्मिन् सूर्यस्पष्टे एव लब्धं प्राण पदांशादिकं युंजीत । यदि स्थिर राशि: स्यात्तदा तन्नवमराशौ युंजीत् । द्विस्वभाव राशौ तु तत्पंचमराशौ युंजीत । अत्र राशि स्पष्टश्च सूर्यस्यैव केवलं नवपंचमराशि

संख्यायोग इति भावः । कल्पितोदाहरणे सूर्यः वृषराशौ २७ अंशात्मकः । अतो वृषान्नवम राशौ योगः । प्राणपदस्य महत्वपूर्ण तात्पर्यं तु इष्टकाल शुद्धि ज्ञानाम विद्यते । इष्टकाल शुध्यर्थं जन्मकालीय चन्द्रस्यष्टस्य गुलिक स्पष्टस्य प्राणपद-स्पष्टस्य च सुतरामावश्यकता विद्यते । अत्रायं नियमो यदि प्राणपदे थवा प्राण-पदात्त्रिकोण स्थाने सप्तमस्थाने तन्नवांशान्नवांशस्य सप्तमाद्वा जन्मलग्नं स्याचदा मनुष्यस्य जन्म भवति । अन्यथा प्राण पदाद् द्वितीये स्थाने द्वितीयात्त्रिकोण स्थाने वा जन्मलग्नं स्याचदा न मनुष्यस्य जन्म भवति । अपितु पशोर्जन्मज्ञेयम् । अथ च यदि प्राण पदात्तृतीये तृतीयात्त्रिकोण स्थान गते जन्म लग्ने जन्म स्याचदा विहंगादीनां जन्म ज्ञेयम् । एवंच यदि प्राण पदाच्चतुर्थे थवा चतुर्थात्त्रिकोणे जन्म चेतदा कीटसर्पादीनां जन्म बोध्यम्प्रकाशक ग्रहाणां द्वादश भावानुरूपं फल कथनम् -

<u>तादौ धूमग्रहस्य फलमाह -</u>

लग्नस्थे जातको, योद्धा, विमलनेत्रः, सुस्तब्धो निर्दयः, क्रूरः, क्रोधी च भवति । द्वितीयस्थे- रोगी, धनी, हीनांगी, राज्यापहृत मानसो मन्दबुद्धिर्नपुंसकश्च प्रोक्तः । तृतीयस्थे बुद्धिमान्, शूरः, प्रियम्वदः, हृष्टचित्तश्च भवति । चतुर्थस्थे नित्यं दुःखितः स्त्रीपरित्यक्तः, सर्वशास्त्र चिन्तकश्च भवति । पंचमस्थे स्वल्पापत्यो धनमित्र मन्त्र हीनः सर्वभक्षी च जायते ।

षष्ठस्थे- बली शत्रुहन्ता, बहुतेजोयुतः, ख्यातो रोग रहितश्च प्रोक्तः सप्तमस्थे-परदार रतः कामी निर्धनो निस्तेजाश्च ज्ञेयः । अष्टमस्थे- विक्रमहीनः, सोत्साही सत्यप्रतिज्ञो, प्रियवक्ता, निष्ठुरः स्वार्थी च निगदितः । नवमस्थे - पुत्र धन सौभाग्य मान दया बन्धु युतो निगदितः ।दशमस्थे- सन्तोषी बुद्धिमान् सुखी पुत्र धन सौभाग्यान्वितश्च कथितः । एकादशस्थे- धन धान्य सुवर्णान्वितो रूपवान् कलाविद्, विनीतो, गीतज्ञश्च भवति । द्वादशस्थे- पतितः, पापकर्मा, परदाररतो, व्यसनी, निघृणः शठश्च भवति ।

द्वादश भावस्थपातु ग्रहफलम् । पाते लग्नस्थे - दुःखी,प्रपीडितः, क्रूरो मूर्खो बन्धुजन द्वेषी घातकश्च भवति । द्वितीयस्थे- जित्यो तिपित्युतो, भोगी,निघृणो कृतज्ञो दुष्टः, पापकरश्च प्रोक्तः । तृतीयस्थे स्थितप्रज्ञो, रणी, दाता, धनी, मानी, सैनापतिर्नृपप्रियो । चतुर्थस्थे बन्धनस्थो रोगी, पुत्रैश्वर्यहीनः, पापश्चजातको निगदितः । पंचमस्थे- दरिद्रः, सुन्दरः कफ पित्त वायु दोषत्रय पीडितो निर्लज्जो निष्ठुरश्च कथितः । षष्ठस्थे- शत्रुहन्ता, सुपुष्टः सर्वास्त्रचालकाः, कलानिपुणः शान्तश्च जायते । सप्तमस्थे- धन स्त्री पुत्र परित्यक्तः स्त्रीजितो दुःखी कामी निर्लज्जश्च भवति । अष्टमस्थे- विकल नेत्रो विरूपी दुर्भगो ब्राह्मणनिन्दको एव तपीडितश्च कथितः । द्वादशस्थे- क्रोधी, बहुकर्म कृद्धर्म दूषको निज बन्धु द्वेष्यश्च भवति ।

अथ च द्वादशभावस्था परिधि फलम्- परिधौ- लग्नस्थे-शान्तः पुत्र धन रूप भोग सुख धर्मान्वितो गुरुवत्सलो दानी च प्रोक्तः । द्वितीयस्थे- रूपैश्वर्य भोग सुख धर्मयुतः प्रभुश्च कथितः । तृतीयस्थे गुरुभक्तः स्त्रीप्रियः सुरूपवान् देवभक्तः, स्वकुटुम्बरतो भृत्यश्च भवति । चतुर्थस्ते- गीतज्ञो विस्मयशीलः, शत्रुमंगलकर्ता,सरलश्च जायते । पंचमस्थे- स्त्रीप्रियो, भोगी धनी, मानी रूपवान धर्मवत्सलो निगदितः । षष्ठस्थे धनपुत्रैश्वर्य योग युतः सर्वभूतहिते रतः शत्रुहन्ता च प्रोक्तः । सप्तमस्थे- स्वल्पापत्यः सुखहीनो मन्दबुद्धिर्निष्ठुरो रुग्ण स्त्री युतो भव भवति । अष्टमस्थे- शान्तो दृढगात्रो, धर्म सत्य व्रतान्वितो धात्म रतश्च कथितः । नवमस्थे- पुत्र सुख धन युत धर्म मान युतो त्प सन्तुष्टश्च जायते । दशमस्थे- भोगी, दृढगात्रो मत्सरः कलावित् , सर्वशास्त्रज्ञो भवति । एकादशस्थे- स्त्री भोगी, गुणवान्, स्वजन प्रियो बुद्धिमान्, मन्दाग्निश्च कथितः । द्वादशस्थे- गुरुनिन्दारतो व्ययकृत् दुष्टो दुःखी च भवति ।

अथ द्वादशभावेषु स्थितिवशाच्चापस्य फलमाह-चापे -

ब लग्नस्थे कृतज्ञः सर्वदोष परित्यागी धन धान्य सुवर्ण युतो भवति । द्वितीयस्थे प्रियम्वदो विनीतः प्रगल्भो विद्वान् रूपवांश्च भवति तृतीयस्थे कृपणश्चौरः कला विदंग हीनश्च = त्यक्त सौहृदो जायते । चतुर्थस्थे सुखी गोधन धान्य युतो राजवन्दितो नीरोगश्च कथितः । पंचमस्थे रूचिमान्, दीर्घ दर्शी, देवभक्तः, प्रियम्वदः, सर्वकर्म समृद्धो निगदितः । षष्ठस्थे शत्रुहन्ता, धूर्तः, सुखी, सर्वकर्मसमृद्धः, शुचिश्च भवति । सप्तमस्थे गणैश्वर्ययुतः शास्त्री धर्मात्मा प्रियश्च ज्ञातव्यः । अष्टमस्थे, पापः, क्रूरः परदाररतो विकलांगश्च ज्ञेयः । नवमस्थे तपस्वी व्रत विद्या मान्युतो लोक प्रसिद्धश्च बोध्यः । दशमस्थे बहु पुत्र धनैश्वर्य गोमहिष्यादि समृद्धो लोक विश्रुतश्च प्रोक्तः । एकादशस्थे लाभयुतो नीरोगः, क्रोधी मन्त्रज्ञः स्त्रीप्रियो स्त्री विद्या विशारदो भवति । द्वादशस्थे खलो अतिमानी, निर्लज्जः परस्त्रीरतो दुर्बुद्धिश्च जायते ।

अथ शिखि केतुग्रहमधिकृत्य तत्स्थितिवशाद् द्वादश भावानां फलमाह- केतौ- लग्नस्थे- सर्वविद्याकुशलो वाग्मी, सुखी सर्वकामयुतो भवति । द्वितीयस्थे प्रियम्वदः, काव्यकृत् पण्डितो, मानी, विनीतो वाहन युतश्चज्ञेयः । तृतीयस्थे कृशांगस्तीव्र, रोगी, कृपणः, क्रूरो निर्धनश्च बोध्यः । चतुर्थस्थे सम्पन्नो रूपगुणसुखश्च सात्विको वेद विच्च प्रोक्तः । पंचमस्थे- सुखी भोगी, गुरु भक्तियुतो वाग्मी बुद्धियुक्ति युतश्च भवति । षष्ठस्थे बहु बान्धव युक्तः, सुन्दरः, शूरो बुद्धिमान् मातृ कुलनाशकरश्च कथितः । सप्तमस्थे रक्त पीडायुतः कामी भोगी वेश्यारतो निगदितः । अष्टमस्थे- नीचकर्मरतः पापी निन्दको निर्लज्जः दु स्त्री सुख रहितो ज्ञातव्यः । नवमस्थे-लिंगधारी सर्वभूत हिते रतः धर्मात्मा प्रसन्नश्च कथितः । दशमस्थे सुखैश्वर्य सम्पन्नः स्त्रीप्रियो

दानी ब्रह्मण्यश्च विज्ञेयः । एकादशस्थे नित्य लाभी धनी मानी बुद्धिमान् यज्ञकृत धर्म रतश्च भवति । द्वादशस्थे पापः परस्त्रीरतो रौद्रः श्रद्धा लज्जा हीनः शूरश्च जायते ।

अथ गुलिकमधिकृत्य द्वादश भावानां स्थितिवशात्फल निरूपणम् -

लग्नस्थे- खलो मन्दो तिदुःखी भवति । द्वितीयस्थे निर्धनी विकृतो व्यसनी निर्लज्जः क्षुद्रश्च प्रोक्तः । तृतीयस्थे- सुन्दरो, ग्रामाधिपः पुण्यात्मा सज्जन प्रियश्च निगदितः । चतुर्थस्थे रोगी दुःखी पापी वात पित्त रोगी कथितः । पंचमस्थे- निर्धनो ल्पायुर्नपुंसकः स्त्रीजितो नास्तिकः क्षुद्रश्च ज्ञेयः । षष्ठस्थे शत्रुहन्ता सुपुष्टांगः स्त्री प्रियः सोत्साहः सुदृढश्च ज्ञातव्यः । सप्तस्थे स्त्रीजितः पापः कृशांग परस्त्रीरतः स्त्रीधनजीवितः सौहृदहीनो निगदितः । अष्टमस्थे दुःखी क्षुधा पीडितः क्रूरः क्रोधी निर्लज्जो धनगुणाहीनो भवति । नवमस्थे बहुक्लेशी कृशांगो दुष्टो निर्लज्जः पिशुनश्च जायते ।दशमस्थे सुख पुत्र भोगैश्वर्य युतो ग्निपूजको योगी च विज्ञेयः । एकादशस्थे- बन्धु हितकरः स्त्रीसुख युतो भोगी पुत्रांश्च बोध्यः । द्वादशस्थे नीचो नीचकर्म कृत्पापीनाहीनोऽलसो दुर्भगश्च प्रोक्तः । द्वादश भावेषु स्थिति वशात् प्राण पदग्रहस्य फलान्याह - लग्नस्थे प्राणपदे मूकोन्मत्तो जडांगो दुःखी कृशो रोगी भवति । द्वितीयस्थे धनधान्य भृत्य बहुपुत्र युतः सुभगश्च जायते । तृतीयस्थे हिंसको निष्ठुरोऽहंकारी गुरुभक्ति हीनश्च कथितः । चतुर्थस्थे सुखी स्त्री वल्लभो रूपवान् सत्यवादी गुरु भक्ति युतो बोध्यः । पंचमस्थे सुखी दयालुः सुकर्मा सर्वकार्य निपुणश्च प्रोक्तः षष्ठस्थे खलश्छली मन्दाग्निर्निर्दयो बन्धु शत्रु वशो ल्प रोगो ल्प आयुश्च ज्ञातव्यः । सप्तमस्थे ईर्ष्यालुः कामी निष्ठुरो भयंकर वपु दुर्बुद्धिश्च कथितः । अष्टमस्थे- रोगी भृत्य बन्धु पुत्रजे पार्थिवैश्च दुःखैः पीडितो भवति । नवमस्थे धनपुत्रैश्वर्य धर्म युतो भृत्यः सरलः प्रियदर्शनश्चोक्तः । दशमस्थे- बुद्धिमान शूरो राजकार्यदक्षो देवार्चनरतो जायते । एकादशस्थे- धनगुण भोगैश्वर्ययुतो

विख्यातो गौरांगो मातृ भक्तश्च कथित: । द्वादशस्थे क्षुद्रो दुष्टो हीनांगो द्विजबन्धद्वेषी नेत्ररोगी काणो वा जायते ।

अर्गला विचार:

प्रथमं तु अमु अर्गला योगस्य महर्षिणा पराशरेण फलकथनार्थं तस्य वैशिष्ट्यं उद्घाटितम् । तत्पश्चात् अन्यैराचार्यै: अपि निरूपितम् । अस्यैव विवेचनम् जैमिनीय सूत्रे सुवैशिष्ट्येन निरूपितम् वर्तते । प्राय: उभयोरपि साम्यं दृश्यते । अर्गलमेव ग्रहाणां भावानां च फलस्य दृढत्वं भवति । अत एवार्गला ज्ञानं सुतरामावश्यकम् । तथाहि ग्रंथकारेणोक्तम् —

मैत्रेय सार्गला नाम यथा भावफलं दृढम् ।
स्थिरं खेटफलं चस्यात् साधुनाकथ्यतेमया । २६
अथात: सम्प्रवक्ष्यामि अर्गला फलमुत्तमम् ।
यस्य विज्ञान मात्रेण ग्रहाणांच फलं वदेत् ।। २७

अर्गलाज्ञान प्रकारमाह -

यदिराशितो ग्रहात् चतुर्थे द्वितीये चैकादशे स्थाने ग्रहस्तिष्ठेत्तदा र्गला-योगो भवति ।

अर्गला बाधक योगमाह -

यदि क्रमशो दशमे द्वादशे तृतीये च स्थाने पि ग्रहास्तिष्ठेत्तदा र्गला योगो भवति । अर्गला बाधक योगमाह - यदि च क्रमशो दशमे द्वादशे तृतीये च स्थाने पि ग्रहास्तिष्ठेत्तदा पूर्वोक्तार्गला योगस्य बाधकत्वम् । न न्यूना विबलाश्च ।। ८ ।। २८
दाराद्युप रोक्तार्गलस्थानस्थ- ग्रहापेक्षया रिःफादि बाधक स्थानस्थ ग्रहा न्यूना अल्पसंख्यका: विबला वक्ष्यमाण बल रहिताश्च विरोधिनो बाधका न भवन्तीत्यर्थ: ।

अर्थात्यपि चतुर्थे ग्रहस्तदार्गला योगस्य दशमे ऽपि ग्रहे सति अर्गला बाधक योग: । एवमेव द्वितीयस्थस्य ग्रहस्य द्वादशस्थेन, एकादशस्थस्य ग्रहस्य च तृतीयस्थेन ग्रहेणार्गला योगस्य बाधकत्वं ज्ञेयम् । यदि बाधक स्थानस्य निर्बलत्वंतदा अर्गला योगस्य बाधकत्वभाव:। निर्बलत्वंच न्यून बलत्वेन न्यू संख्यया च भवति । यथा यदि चतुर्थे ग्रहद्वयं दशमे चैक एव तदा नार्गला बाधकत्वमिति । अर्गलाया: त्रिविधत्वम्- यधेकग्रह युतार्गला स्यात्सा कनिष्ठोच्यते । द्विग्रहयुता च मध्यमा, ग्रहत्रय युता मुख्या पूर्णा वा प्रोक्ता । पुनस्तस्य शुभाशुभ भेदेन द्विविधित्वम्- अर्थात्यदि पापग्रह युता तदा पापार्गला, शुभग्रह युता तदा शुभार्गला भवतीति भाव: । अर्गला ज्ञाने विशेषमाह- यदि राशितो ग्रहतो वा तृतीयस्थाने पाप ग्रह त्रयस्य ततो धिकस्य वा योगस्तदापि चार्गला योग: । अर्थात्त्रैक पाप ग्रह योगे द्विग्रह योगे वा नैवार्गला योग: । उक्तं च जैमिनीय सूत्रे - प्रागवत् त्रिकोणे (६) विपरीतं केतो: (१०)त्रिकोणे पंचमनवमयो: प्राग्वत् पूर्वोक्त सूत्रवत् अर्गला तत्प्रतिबन्धकादिकं ज्ञेयम् । पंचमे ग्रहसत्वे र्गला, नवमे तत्प्रतिबन्ध: बाधकस्य न्यूनत्वे निर्बलत्वे न प्रतिबन्धकत्वमित्यर्थ: केतोस्तमोग्रहस्यार्गला तद् बाधक- स्थानम् रिष्फ (१०) नीच(१२) कामा(३) अर्गला स्थानानि । दार(४) भाग्य(२) शूलानि (११) तद्बाधक स्थानानीत्यपि ज्ञेयम् ।[१६]

१६ उक्तं च जैमिनीय सूत्रे —

दारभाग्य- शूल- स्थार्गला निधातु: ।
रिष्फ-नीच-कामस्था विरोधिन: ।।

तथा हि निरूपितं वृहत्पाराशरे —

एकेन द्वितीयेनापि अर्गला या भवेद्विज ।
सार्गला नैव विज्ञेया बहु पापयुतिं विना ।।

महर्षि जैमिनिना अपि तथैव उद्घाटितं वर्तते —

कामस्था भूयसा पापानाम्[20]

त्रिकोणार्गला माह –

यदि पंचमे स्थाने पि पूर्ववद् ग्रहा द्राशितो वा ग्रह योगस्तदापि चार्गला युग: । अस्य बाधकत्वं नवमस्थेन ग्रहेण भवतीति विशेष: । अथ केतोर्वैपरीमिथ्यां यदि केतुर्नवमस्थो भवति ग्रहतो राशितो वा तदार्गला योग कारकस्तस्य च बाधकत्वं पंचमस्थेन ग्रहेण भवति ।

निर्बाधकाया अर्गल्या वैशिष्ट्यम् —

निर्बाधकाया अर्गला सैव फलदा न तु सबाधका । अर्थायदि ग्रहतो राशितो वा चतुर्थे द्वितीये चैकादशे पंचमेग्रहस्तदार्गला योग: एवं दशमे द्वादशेतृतीये नवमे चापि ग्रह योगस्तदा सा सबाधकार्गला, सा नैव फलप्रदा । यदि बाधक स्थाने न्यूनबलत्वन्तदा सार्गला नैव सबाधकोच्यते । अपि तु सापि फलप्रदेति भाव: । अर्गला योग युक्तस्य ग्रहस्य राशेश्च वा दशाकाले फल प्राप्तिर्भवति ।

फलप्रकरमाह– लग्ने लग्ना रूढे लग्नाल्लग्नारूढाच्च सप्तमे पूर्वोक्त प्रकारेण निर्बाधार्गला भवति । तज्जन्मलग्नोत्पन्नो मनुष्यो महाभाग्य युतोभवीता स धन धान्य पुत्र पशु स्त्री बन्धुयुत: शरीर रोग्यैश्वर्य भृत्यवाहनान्वित: प्रभु भक्त: सुधर्मज्ञश्च जायते इति भाव: ।

बृहत्पाराशर्यम् काशी संस्करणे द्वादश भावरीत्यापि फलंप्रोक्तम् । द्वितीये धन प्राप्तिस्तृतीये सोदरणां सुखं चतुर्थे गेह पशुबन्धुकुल सुखं पंचमे पुत्र पौत्रादियोगः षष्ठे शत्रुभयं सप्तमे धनदारादि सुखं अष्टमे कष्टं नवमे भाग्योदयो दशमे राजसन्मानमेकादशे लाभो द्वादशे व्ययाधिक्यमिति ।[२१] अत्र पापग्रह योग युक्तार्गला पि मध्यमसुख प्रदा कथिता, किं पुनः शुभग्रह योग युक्तार्गलाया माहात्म्यम् । सा तु बहुविध सुखैश्वर्यप्रदा भवतीति स्वतः सिद्धम् । मिश्रग्रहा शुभाशुभ ग्रह्योगयुक्ता चार्गला पि शुभफलदात्रेया ।

अत्र विशेषः
----------

अर्गला योगकारको ग्रहोपि यदि लग्नं पश्येत्तदा स ग्रहो पि महाभाग्यदो भवति परञ्च तस्य निर्बाधकत्वमावश्यकमिति । लग्ने सप्तमे- चार्गलायोगो विशेषेण भाग्य प्रद इति जैमिनिना स्वकीये जैमिनिसूत्रे उक्तम् -

'शुभार्गले धन समृद्धिः'

यस्य पापः शुभो वापि ग्रहस्तिष्ठेच्छुभार्गले । तेन द्रष्टेक्षितं लग्नं प्राबल्यायोप कथ्यते । यदि पश्येद्ग्रहस्तन्न विपरीतार्गलास्थितिः ।।[२२]

उपपद निरूपणम् :
oooooooooooooooooo

लग्नाद् द्वादशभावमधिकृत्य उपपदस्य व्याख्यानम् । यथा लग्नाद्यावद्दूरं लग्नेशो लग्नेशाच्च तावद् दूरं पदमुच्यते । इत्थमत्रापि द्वादश भावाद्यावद्दूरं लग्नेशो लग्नेशाच्च तावद् दूरं पदमुच्यते । इत्थमत्रापि द्वादश भावाद्यावद्दूरं द्वादशभावेशो

भवेत् द्वादश भावेशाच्च तावद्दूरं यो भावः स उपपद वाच्यइति । यथा हि यदि द्वादशेशः स द्वादशाच्चतुर्थस्थ स्तदा द्वादशेशात् चतुर्थो भावः घनराशिः स्वोप पदमिति ज्ञेयम् । जैमिनि सूत्रे 'उप पदं पदं पित्रनुचरात्' [23] अत्र पितृ शब्देन कटपय पद्धत्या लग्न शब्दस्यैव ज्ञानम् । केश्चिद् टीका कारैरत्र पितृशब्देन सप्तमस्योल्लेखो विहितः तस्य आचार्यं नीलकंठेन निराकरणंकृतम् । यदि लग्नस्थाने सप्तमस्यैव अभिप्रायः आसीच्चदा उपपदं लाभादिति जैमिनिना लेख्यमासीत् । तथा चात्र होराशास्त्रे लग्नानुचरमिति स्पष्टः पाठः । अत्र केचित् पित्रनुचरशब्दस्य विषमलग्ने क्रमगणनया द्वादश भावस्य समलग्ने चोत्क्रमगणनया द्वितीय भावस्य पदमुपपदमिति स्वीकुर्वन्ति । 'पित्रानुचर' इति शब्दस्य जैमिनीय सूत्र टीकाकारेण कृष्ण स्वामिना च द्वितीय भाव एवार्थः कृतः । आचार्य नर नीलकण्ठेन तु सर्वेषां निराकरणं कृत्वा द्वादशभाव एव स्वीकृतः । स एव बहु सम्मतः ।

## उप पदानुसारेण फलकथनम् :

उपपदारूढस्य द्वितीय भावे पापग्रह युते दृष्टे सम्बन्धे, नीचग्रहे नीच सम्बन्धे वा प्रव्रज्या योगः, अथ वा भार्या विरोधो भार्यानाशो वा बोध्यः अत्र सूर्यस्य सिंह राशौ पापत्वं न प्रोक्तम् । अर्थात् यदि द्वितीयभावे सिंह- राशौ सूर्यः स्थितश्चेत्तदा न दार नाशः । अपितु गृहिणी सुखमिति भावः ।

तत्र पापस्य पापयोगे प्रव्रज्या दारनाशो वा
उपपदस्याप्यारूढत्वा दैवनात्र रविः पापः, [24]

मेषादि पापराशौ च सूर्ये स्थिते दारानाश योग एव केवलं सिंह राशिरेव सूर्यकृते न पाप राशिरिति ज्ञेयम् ।

उप पद द्वितीय भावे शुभ ग्रहयुते दृष्टेसम्बन्धे उच्चस्थे, उच्चनवांशे मिथुन-राशियोगेपि बहुदारयोग: प्रोक्त: । स्व स्वामियुते वृषस्थे तुलास्थे शुक्रे चापि चोच्चायुष्मि पत्नीनाश योग: , उपपदस्य द्वितीय भावेशे चोच्चस्थे श्रेष्ठ कुलदार प्राप्ति:। शुभग्रह युते दृष्टे च रूपवती भार्या योग: । अत्र शनि राहु योगे स्त्रीत्यागस्य नाशस्य वा योग: । केतु शुक्र योगे भार्याया रक्तप्रदर रोग योग: । बुध केतु योगे चास्थित स्राव रोग योग: । स्थूलांगी योगो वा शनि रवि राहु योगे चास्थिर ज्वररोग योग: । बुध राशौ भौम युते थवा वा मंगल शनि योगे प्राणारोगार्ति पित्त योग: । अब बुध मंगल योगे शनि योगे वा कर्णरोगवती नेत्र रोगवती वा पत्नी भवति । भौम बुध योगे च वा राहु गुरु योगे दन्त रोगार्ता भवति । कन्या राशौ वा अन्य राशौ शनि राहु योगे पंगु योग युक्ता पत्नी कथिता । अत्रापवाद: । पूर्वोक्त योगेषु शुभ ग्रह युते दृष्टे वा सति वैपरीत्यम् । अर्थात् ते योगा: पूर्वोक्त कुफल प्रदा न भवन्तीति भाव: । २५ "शुक्रेष्वनपत्य: पुत्रेषु रवि-राहु-गुरुभिर्बहु पुत्र: चन्द्रेणैक पुत्र:, मिश्रे विलम्बात् पुत्र: कुज शनिभ्यां दत्तपुत्र:, ओजे बहु पुत्र: युग्मे ल्पप्रज:" २६

जैमिनि महर्षिणा उपपदादपि सन्तति विचारमुक्तम् ।

लग्नादुपपदाद्वा सप्तमे भावे सप्तम भाव नवांशे वा सप्तमेशस्य नवांशे सप्तमेशस्थ राशौ वा पापयुते दृष्टे वा शनिबुध शुक्र योगे नपत्य योग: । पदोपपद जन्मलग्नानां पंचमस्थे पुत्रकारके गुरु सूर्य राहु योगेच बहुपुत्र योग: । पुत्रश्च बल वीर्यवान् प्रचण्डयोद्धा विजयी शत्रुहन्ता भवति । अत्र केवल चन्द्रयोगे चैक एव पुत्र: कथित: । अत्र पाप शुभ मित्र योगे च चिरात्पुत्र योग: । अत्र भौम बुध योगे चानपत्य योग: । अथवा दत्तक पुत्रवान् भवति । कन्यास्थाने पर पुरुष कृत गर्भ युतापा स्त्रिय: सह विवाहो वा भवति तस्यां जातस्य पुत्रस्य योग इति भाव: ।

अत्र विषम राशौ बहुपुत्र योगः । मिथुन राशौ सम राशौ च स्वल्पापत्य योगः । अत्र सिंह राशौ सूर्य योगे तथोपपद लग्ने च सिंह राशौ चन्द्र युते दृष्टेवास्वल्प पुत्र योगः कन्या योगो वा ।

अन्य योगाः

अत्र पंचम भाव नवांशात्पुत्र कारकांशिंशांश कुण्डल्यामपि पंचम भाव नवांशात् पंचम भाव स्वामितो वा पूर्वोक्त सन्तति योगा विचार्या इति विशेषः ।

जैमिनीय सूत्रे यथा -

सप्तमांशग्रहेभ्यश्चैवम् इत्यादि सूत्राणि द्रष्टव्यानि ।[२७]

उपपदात् भ्रातृविचारः

उपपदात् तृतीये शनि राहुयोगे भ्रातृनाशः अयं योगश्चैकादशे भावे स्यात्तदा ज्येष्ठ भ्रातृनाशः तृतीये चकनिष्ठ भ्रातृनाशः इति भावः । अत्र तृतीये शुक्रे कनिष्ठ गर्भस्य तत्र तथैकादशे शुक्रे पूर्वगर्भस्य ज्येष्ठस्य नाश योगः । उपपद लग्ने ष्टमे वा शुक्रयुते दृष्टे पूर्वोक्त योगे च मातृ गर्भनाश योगः । अत्र तृतीये भौम गुरु बुध चन्द्रयोगे बहु भ्रातृयोगः ।मातृणांच प्रजापित्व योगोपि ।अत्र शनि भौमयुते दृष्टे वा तृतीये चैकादशे कनिष्ठ ज्येष्ठ भ्रातृनाश योगः । केतु योगे बहु भगिनी योगः । उपपदात्सप्तमे द्वादशे वा राहुयुते दृष्टे वा ज्ञानवान् बहुभाग्य युतो जातको भवति ।

उपपदस्य सप्तमेशाद् द्वितीये केतुयुते दृष्टे वा जातकः स्वन्धाक् स्खलित

वाग्वा भवति । उपपदात्षष्ठस्थे पापग्रहे शुभ दृष्टिशून्ये च जातकश्चौरो भवति । अत्र उपपदेशाद् द्वितीये राहुयुते मूक योगः । केतुयोगे दन्तुल योगः वातव्याधिश्च । शनि योगे गौरः श्यामो नीलपीतो बुद्धिमान् भवति ।

'अमात्यानुचराद् देवा भक्तिः'[28]
वृहत्पाराशर्यमिपि-
'अमात्यानुचराद्विप्रदेव भक्तिं विचिन्तयेत्'[29]

अर्थादमात्यकारकात् न्यून अंशात् देवता भक्ति विचारः कार्यः । तस्ये पापत्वे क्रूर देवोपासना, शुभत्वे च शुभदेवता भक्तिः ।

## परजात योगाः

आत्माकारकस्य नवांशे पापदृष्टे सम्बन्धे पापनवांशे वा । शुभग्रह युति रहिते च (जारज) परजात योगोभवति । यदि चात्मकारक नवांशपति पापश्चेत्तदा जारजयोगा भावः । अन्य ग्रहाणां पापयोगे थ वाष्टमस्थे पापे जारज योगाभावः । अत्र शनि राहु योगे भवा शनिराहु दृष्टे वा जारज इति लोके प्रसिद्धिः स्यात् । वस्तुतस्तु स न जारज इति भावः । अत्र शुभ ग्रह वर्गे शुभग्रह योगे चापि न जारजः केवलं 'जारज' इति कथन मात्रं लोके ज्ञेयम् । अत्रात्मकारक नवांशे स्वोच्चस्थ ग्रह द्वय योगे जातकः कुल मुख्यः प्रोक्तः ।[30] अपि च यदि लग्नात्पूर्वाष्टक पर्यन्त सर्वे ग्रहास्युस्तदा सौख्य प्राप्ति योगः । कारकांश फलाध्याये पराशरेणेदं लिखितम् पदयं विचारः पूर्वं भगवता शंकरेण रूद्रयामले ग्रन्थे भाषितम् तथाहि ।

यथावद्भाषितं शूलिना प्रोक्तं यद्रुद्रयामले ।[31] अनेनेदं ज्ञायते यत्कारकानां ज्ञान प्रक्रिया पराशरात्पूर्वमपि आसीत् इति । अच्युतानन्द झा महोदयेन जैमिनिसूत्रस्य

व्याख्याने प्रसंगेन पराशरकारिकाया वचनं कारक विवेचनावसरे उद्धृतम् । ते च श्लोका अस्य वृहत्पाराशर होराशास्त्रस्यैव सन्ति तथा हि -

'आत्मकारक खेटेन न्यूनभागोहि यद्ग्रह: ।
अमात्य संज्ञा तस्यैव ज्ञायते द्विजसत्तम ।।[32]

कारकानां कारकांशे कुण्डली चक्रस्य पदोपपदयोर्विशेष चर्चा पराशरवद् जैमिनिसूत्रेपि पूर्णरूपेण दृश्यते । जैमिनिना प्रथम अध्यायस्य प्रथम पादे कारकानयन प्रकारो दर्शित: । तथा च तत्र तेन 'स इष्टे बन्धमोक्षयो:' इति सूत्रे आत्मकारकस्यैव प्राधान्यं प्रदर्शयता बन्धमोक्षयो: चर्चा कृता । बन्धमोक्षौ एव भारतीय धर्म संस्कृति परम्परायां महत्वं धारयत: । अनेनात्मकारक एव बन्धन मोक्षयोराधारभूतो द्वितीयो जीवात्मैवेति दर्शनशास्त्र रहस्यमपि प्रकटीकृतम् । कारकांशफलमपि प्रथमाध्यायस्य द्वितीय पादे विशेषरूपेणांकितम् । कारकांशादेव सुख दु:ख रोगाजिविका पुण्य कर्म निर्माण कारण गृह निर्माण गुरुभक्ति कलत्र विचार मरणानन्तर गन्तव्यस्थानादिकस्य, शिवगौरी लक्ष्मी स्कन्दादीनां भक्तिकारणस्य विविध रोगाणां विविध व्यवसायस्य च चर्चा दृश्यते । पदोपपदाभ्यामपि पूर्वोक्त विविध फलज्ञानमंकितम् । आचार्य वराह मिहिरेण नानुसृतो यं मार्ग: । तेन केवलं प्रकीर्णकाध्याये भावानुरूपं ग्रहाणां कारकत्वं स्वीकृतम् । अर्थात्केन्द्रस्था: ग्रहा: परस्परं कारकास्तत्रापि दशमस्थो ग्रहो विशेषेण कारक इत्यादिकं लिखितम् । सारावलीकारेण कल्याणवर्मणापि वराहमिहिरस्य मार्गो नुसृत: । केवलं विविध वस्तुजातस्य कस्मात् कामात् ग्रहात् विचारो विधेय इति प्रतिपादितम् । सूक्ष्मवस्तूनां फल ज्ञाने कारक प्रकरणस्य महत्वपूर्णमस्थानं जैमिनिना तु अस्य पूर्णरूपेणानुकरणं कृतम् । भावानां ग्रहाणांच नवांश एव तत्वमत एव यद् वस्तु जातं भावै: ग्रहैश्च न स्पष्टं भवति।

तच्च नवांशेन स्पष्टं ज्ञायते । नवांशस्य फलित शास्त्रे महत्वपूर्णं स्थानं विद्यते । तथा च यस्य ग्रहस्यांशा अधिका सग्रहो कारकेनांगीकृत: । अतश्च कारकाणां कारकांश कुण्डली चक्रेण फलकथनमतीव चमत्कारि ।

पराशरादुत्तर वर्तिषु ऋषिषु ज्योतिष शास्त्रे जैमिनिरेव प्राधान्यम् । तेन हि न केवलं राज योगानामपि तु बन्धनादिकानामन्येषामपि योगानां सविशेषं चर्चा विहिता -

जैमिनीय सूत्रे फल विशेष प्रतिपादनार्थं कारकस्य वैशिष्ट्यं चलकारकश्च

ज्योतिषशास्त्रे कारकस्य विचारो अतीवाश्यक;महत्वपूर्णश्च । कस्य भावस्य कस्य वस्तुत: को ग्रह: कारक: ? तस्य ग्रहस्य बलाबल ज्ञाने सति तद्भावस्य तद् तद् वस्तुनो लाभालाभस्य च ज्ञानं भवति । अतश्चात्र कारकाणां विचारस्य सुतरामावश्यकत्वम् । अस्मिन् जैमिनीय सूत्रे कारक विचार: प्रथमाध्यायादेव प्रारभ्यते ।

ज्योतिषशास्त्रे सूर्यादिग्रहसंख्यैव कारका अपि सप्तसंख्याका: प्रोक्ता: । आत्मामात्य भ्रातृ पुत्र ज्ञाति दारेति सप्त प्रकारकोयं कारकभेदा: । सप्त ग्रहेषु यस्यांशा अधिका: स आत्मा कारक: । स आत्मा कारको बन्धमोचयो: दु:ख सुखयो: च ईष्टे समर्थो भवति । नीचारि पाप सम्बन्धाद् दु:खदायक: स्वोच्च मित्रादि सम्बन्धोत्सुखदायको भवतीत्यर्थ: तथा चोक्तं —

नीचारिक्रूर सम्बन्धात् बन्ध कृत स्वदशास्वयम् ।
सुहृत्स्वाम्योच्च सम्बन्धाज्जनानां मोक्षदायक: ।।[१]

अंशतुल्ये विकलाधिक्य: इति कला साम्ये विकलाधिक्य इति आत्माकारकान्न्यूनांश कलादिको मात्यकारक: । तस्यानुसरणादमात्य।।१३।।तस्य भ्राता।१४।।तस्यमाता ।।१५ ।। तस्य पिता ।।१६।। तस्य पुत्र ।।१७।। तस्य ज्ञाति: ।।१८।।तस्य दाराश्च।। १९।।[२]

तस्यात्मकारकस्यानुसरणात् आत्माकारकापेक्षया ल्पांश तया पश्चादवस्थानात् अमात्यो मन्त्रिकारको भवति तस्यामात्य कारकस्य अनुसरणात् अमात्य कारकादल्पांशो भ्राता भ्रातृ कारक: । एवमेव क्रमादल्पा ल्प कांशा ग्रहा मातृ-पितृ-पुत्र- ज्ञाति-दार-कारका ज्ञेया: । आत्मकारकाद् न्यूनो भ्रातृकारक: तन्न्यूनांशादिको मातृकारक: । तन्न्यूनांशादिक: पुत्रकारक: । पुत्रकारकान्न्यूनांशो ज्ञाति कारक: । तन्न्यूनांशादिको दारा कारक: । अत्रात्मकारकस्यैव प्रधानत्वम् । यथा राजा सर्वेष्वमात्यादिकेषु सर्वप्रधान: कर्तुम कर्तुं शक्त एवमत्रापि ग्रहेषु आत्मकारकस्यैव प्रधानत्वमुक्तम् जैमिनीय सूत्रे- 'स ईष्टे बन्धमोक्षयो:'[3] अत्र च एते सप्त चर संज्ञका: कारका उच्यन्ते । विशेषोऽत्र यदि ग्रह द्वयस्यांशा दिकं तुल्यन्तदा राहुमपि कारकत्वेन गृह्णीयात् । आत्माधिक: कलादिभिर्नभोग: सप्तानामष्टानां वा[4] एतस्मिन् प्रसंगे नीलकंठाचार्येण टीकायामिदमेव स्पष्टीकृतं यद् ग्रहाणामिति वैपरीत्यादंशादिकेषु न्यूनत्वमेव ग्राह्यम् ।[5] अर्थादत्र यदि दमुक्तमंशाधिक एवमात्मादिकारकस्तत्र राहु ग्रहणे सति न्यूनांशे स्य बलत्वमिति भाव: केषांचिदाचार्याणां मते मातृकारकादेव पुत्र कारक विचार: कार्यं इत्यभिमतं बृहत्पाराशरं ग्रन्थे काशी मुम्बई संस्करणे च नोल्लेख: । परं बीजं तु अस्य जैमिनीय सूत्रे चोप लभ्यते —

'मात्रा सह पुत्रमेके समामनन्ति'[6]

यदि ग्रहद्वय स्यांशादिक साम्यं स्यात् तर्हि द्वयस्यैकारकत्वम् । ननु यदि द्वयस्यैक कारकत्वन्तदा सप्तकारकत्वे षट् कारकत्वं भविष्यति । चैनन यतो ह्यग्निकारकस्य स्थिरकारकाद्विचारो विधेय: । चरकारश्च त्याज्य इति भाव: । केचिदाचार्या मात्रा सह मातृकारकेण समं पुत्रं पुत्रकारकं समामनन्ति । मातृ कारकादेव पुत्रस्यापि विचारं कुर्वन्तीत्यर्थ: सप्तकारकमतानुयायिनां मध्येऽपि मतद्वयं केचित् पृथक् पुत्रकारकं

न मन्यते केचित् पितृकारकं न मन्यते ।[७] अष्टकारकमतावलम्बिनस्तु पृथगेव पितृ पुत्र कारकौ मन्यन्ते ।

उदाहरणरूपं सप्तकारक चक्रम् -

| आत्मा | अमात्य | भ्राता | माता | पुत्र | ज्ञाति | दारा |
|---|---|---|---|---|---|---|
| शु० | सं | बृ० | शनि | सूर्य | बु० | च० |

अथाष्टकारक चक्रम् -

| आत्मा | अमात्य | भ्राता | माता | पुत्र | ज्ञाति | दारा |
|---|---|---|---|---|---|---|
| शु० | मं० | बृ० | श० | सू० | बु० | च |

नित्यकारकमर्थात्य उक्तं च जैमिनीय सूत्रे -

भगिन्यारतः स्यालः, कनीयान् जननी च ।।२१।। आरतः कुजात भगिनी, स्यालः पत्नी भ्रातः कनीयानुजः माता चैति विचार्याः । बुधात् मातृलादयो बान्धवो मातृ सजातीया मातृतुल्या इति विचार्या : पितामह पति पुत्रविति गुरुमुखादेव जानीयात् ।[८] गुरुमुखाद् वृहस्पत्यादितः क्रमेण पितामह पति पुत्रौ इति जानीयात् । वृहस्पतितः पितामहं, शुक्रात् पतिं स्वामिनं शनेः पुत्रं

विचारयेदित्यर्थः । ग्रहाणामन्ते वसतीति अन्तेवासी तमोग्रहः केतोः पत्नी भार्या, पितरौ, मातापितरौ, श्वसुरौ, श्वश्रू, श्वसुरौ, मातामहा इति सर्वे विचारणीयाः । मन्दो ज्यायान् ग्रहेषु[६]

ग्रहेषु मन्दः शनिः स्थादिषु जायमान वृद्धो भु भु दुर्बल इत्यर्थः । अत्र ज्या यान्- दाड ज्यान् इति दुर्बलार्थ बोधकः । अतः सूर्योदयो ग्रहाः उत्तरोत्तर क्रमात् दुर्बला भवन्तीति सिद्धयति । केचितु श,कु० कु० शु च राधा वृद्धितो वीर्यवन्तः । इति वृहज्जातकोक्तं बल स्वीकुर्वन्ति । तथा च ग्रहेषु शनेर्दुबलत्व कथनात् राहुकेत्वो ग्रहत्वे तयोः सर्वग्रहापेक्षया बलित्वमायातीत्यनुक्तमपि ज्ञेयम् ।

चरदशाफले विशेषः

नाथान्ताः समाः प्रायेण[१०]

चरदशामां राशिनां नाथान्ताः स्व स्वाधिपाश्रित राशिपर्यन्ताः समा दशा वर्षाणि भवन्ति अयं भावः । तथा चोच्चस्थे स्वामिन्यैक वर्षवृद्धिः, नीचस्थे स्वामिन्यैक वर्ष ह्रासः इत्यादिकं सूचितं वर्तते ।

तस्माच्च दीशपर्यन्तं संख्यामत्र दशां विदुः ।
वर्षं द्वादशकंतत्र न चैदेकं विनिर्दिशत् ।।[११]

चरदशाफले द्वादश राशीनां दशायां तेषामन्तर्दशायांच फलमाह । दशाधीशो ग्रहो यास्मिन् राशौ स्थितस्तत आरभ्य द्वादशराशीनामन्तर्दशा ज्ञेया । तत्र यो राशिः स्व-स्वामि युतो, मित्रयुतो वा तस्मिन् राज्यादि सम्पत्प्राप्तिर्ज्ञेया । यत्र पापो नीचः शत्रुस्थो वा स्यात्तत्राशुभं फलं वाच्यं । यत्राष्टकवर्गीय शुभ चिन्ह बाहुल्यक्ता

शुभम् । स्व स्वभाव क्रमेणापि पुत्रदारादिकानां शुभाशुभं बोध्यम् । यथा पुत्र चिन्तायां पंचमस्थानं पुत्रलग्नमव बुध्य ततश्च द्वितीय स्थानात्पुत्र धन चिन्ता तृतीय स्थ नात् पुत्र भ्रातृणां चिन्ता चतुर्थात् पुत्र मातृ चिन्ता पंचमात् पुत्र विद्यादि चिन्ता चेत्यादिकं सर्वं विचार्यैव मातृपितृ दारादिकानामपि ज्ञेयम् । अथ चात्र यदि दशा प्रद राशितो ष्टमपंचम नवम भावेषु पापग्रहश्चेत्तदा सा दशा दुःख प्रदा ज्ञेया । यदि च तृतीय षष्ठ्य भावगतः शुभग्रहो भवेत्तदा पराजयादिकमशुभं ज्ञेयम् । दशा प्रदराशितः एकादश भावगतः पापः शुभो वा ग्रहः स्यात्तदा तु शुभमेवा फलं ज्ञेयम् । अथ च यदि दशप्रद राशिः शुभग्रह युतश्चेत्तदा शुभं फलम् । अशुभ ग्रह युतः स्यात्तदा चाशुभं फलमिति विशेषेण ज्ञेयम् । एवं शुभराशौ शुभग्रह योगे सदा शुभं फलं ज्ञेयम ।

द्वितीय पंचम चतुर्थभावेषु राजप्रीतिजय सौख्यारोग्यादिकं प्रोक्तम् । तृतीयस्थे पापे शत्रु जयो ज्ञेयः । चतुर्थस्थे पापे स्थान हानिः सप्तमस्थे पापे स्त्रीकष्टं दशमस्थे कीर्तिहानिः, नवमस्थे पितृपीडनमित्यादिकंचात्र ज्ञेयम् । एवं शुभ ग्रह योगे सौख्यं वाच्यं केन्द्र स्थानेषु अपि शुभ ग्रहेषु लाभ शत्रु जयादिकं ज्ञेयम् , पंचमे पदक्रमात् प्राक् प्रत्यत्वं चरदशायाम् [१२] चरदशायां पंचमे म लग्नान्नवमे पदक्रमात् विषमसम पदक्रमतः प्राक् प्रत्यक्त्वं क्रमोत्क्रम गणना भवति । ग्रन्थकारेण केतुः चरदशायां शुभमाह, 'अत्र शुभः केतुः' [१३]
अथ चरदशायां केतुः शुभफल प्रदः स्यादित्यर्थः ।
सर्वत्र सवर्णा भावा राशयश्च ।।३४ ।। ।। नग्रहाः ।।३५।। [१४]
जैमिनीय सूत्रे आदितो न्त पर्यन्तं भावा राशयश्च सवर्णा एकादि संख्या बोधका चार गम्याः , तथा चकारात् सवर्णा वर्णं वर्णादेन वर्णदराशि सहिता ज्ञेया ।

नग्रहाः, राशिवत् ग्रहाः वर्णं गम्या न शक्नुवन्ति । जन्म लग्न होरालग्न योर्मध्ये यो राशिर्बलवान् तस्माद्वर्णद दशा प्रवृत्तिर्भवति । होरालग्न जन्मलग्नयोर्द्वयोर्विषम राशि संज्ञके सम राशि संज्ञके वा द्वयोर्योगः कार्यः युक्ते यो राशिः स वर्णदराशिरिति । 'अथ होरादयः सिद्धाः'[१५] इति महर्षिणां मतम् ।

पद विचारः

लग्नाद्यावद्दूरं लग्नेशो वर्तते लग्नेशाद्यावद्
दूरस्थ भावमधिकृत्य पदं निगदितम् ।
अस्यैवापरं नाम लग्नारूढ मित्युच्यते -
यथा यदि लग्नेशो लग्नात्पंचमस्थस्तदा
पंचमात्पंचमो नवमो भावो लग्नारूढ इति भावः । उक्तंच बृहत्पाराशर्यम् -

स्वस्थानं सप्तमं नैव पदं भवितुमर्हति ।
तस्मिन् पदत्वे विज्ञेयं मध्यं तुर्यं क्रमात्पदम् ।।
यथा तुर्यस्थितिनाथे तुर्यमेव पदं भवेत ।
सप्तमे च स्थिते स्थितेनाथे विज्ञेयंदशमं पदम् ।। [१६]

अर्थात् यदि चतुर्थेशः चतुर्थे स्थाने तदा चतुर्थमेव लग्नारूढम् । सप्तमेशश्च यदा सप्तमे तथा दशमं स्थानं पदम् ।जैमिनीय सूत्रे टीकाकारेण आचार्य नीलकण्ठेन नायं मार्गो नुसृतः । तेन वृद्ध वचनोद्धरण पुरः सरमिदं मतमेव पुष्टीकृतम् ।

'लग्नाद्यावतिथे तिष्ठेद्राशौ लग्नेश्वरः क्रमात् ।
ततस्तावथितं राशिं जन्मारूढं प्रचक्षते ।[१७]

भ्रमा पराशरेणाऽपि इत्थमुक्तम् —

'जनुर्लग्नाल्लग्नस्वामी यावद् दूरं हि तिष्ठति । तावद्दूरं तदग्रे च लग्नारूढं च कथ्यते ।[१८] जैमिनीय सूत्रद्वयस्य व्याख्याने एव मतभेदः -

स्वस्थे दाराः, सुतस्थे जन्म[१९]

इति सूत्रयोरर्थं निरूपणे चाचार्यं नीलकण्ठेनेदमुल्लिखितम् । 'यदि लग्नाच्चतुर्थे स्थाने लग्नेशः तदा सप्तमस्थानं सप्तमस्थाने लग्नेशश्चेत् तदा लग्नमेवारूढ पदमिति भावः । बहु सम्मतमिदमेवमतम्[२०] अन्यैः कैश्चित् टीकाकारैः पूर्वोक्तं मतमेव पुष्टम् । तैः दार शब्दस्य चतुर्थो भावो जन्मशब्दस्य दशमो भावः स्वीकृतः । आचार्य नीलकंठ मतमेव युक्ति युक्तम् । यतोहि चतुर्थस्थे लग्नेशे लग्नेशात्सप्तममं लग्नमेव युक्तमिति । अत्रेदमपि ज्ञेयं यद्यदि लग्नस्थश्चेल्लग्नेशस्तदा लग्नमेव लग्नारूढ मिति भावः । ये योगाः नवम स्थानेत्र प्रोक्ताः ते द्वितीय भावे पि ज्ञेयाः कारकांशे द्वितीये पाप दृष्टे केतौ वाचाल योगः । कारकांशमधिकृत्य केमद्रुम योगमाह- अशुभो यं योगः । दशारम्भ-काले ग्रहस्पष्टं विधाय लग्नादिभाव स्पष्टं कुर्यात् । तस्मिन्काले यदि जन्म लग्न सदृशो योगस्तदा पूर्णफलम् । अन्यथाल्पफलमिति भावः । अस्य सर्वं पाठस्योल्लेखः जैमिनीय सूत्रेषु उपलभ्यते —

'अथस्वांशे ग्रहाणाम्, पंचमूषिका मार्जाराः, तत्र चतुष्पादः, मृत्यौकण्डू स्थौल्यंच च, दूरे जल कुष्ठादि, शेषाः श्वापदानि ।[२१]

स्वांशेपंच चेत्तदा मूषिकामार्जारा दुःखदा भवन्ति वृषश्चेत्तदा चतुष्पादाः वृषभादयः सुखदा भवन्ति ।स्वांशे मृत्यौकण्डुः स्थौल्यं जन्मकुष्ठादि रोगश्च स्यात् ।

स्वांशश्चेत्दा ऽश्व, सिंह पदानि दुःखदायकानि भवन्ति । कन्या चेत्दा मृत्युवत् मिथुनवत् फलं, अग्नि कणाश्च भयप्रदः । तुलांशे लाभे वाणिज्यं, वृश्चिकांशेजलसरीसृपाः भयदायकाः स्तन्यहानिर्मातुर्दुग्धनाशो भवति । धूष्णिकारकांशे वाहनात् उच्चादुच्च प्रदेशाच्च क्रमात् पतनं, अवलम्बनपूर्वकं पतनं स्यादित्यर्थः । अत्र 'समे' इति पतनस्थलस्य विशेषणमपि प्रतिपादितम् । मकरांशे चलचटा नक्रादयो जलजन्तवः खेचराः पक्षिणः, खेटाः यदा ग्रहादयः कण्डुः दुष्टग्रन्थिः कुत्सितग्रन्थिश्चैते क्लेशदायका भवन्ति । कुम्भांशे तडागादयः मीन कारकांशे धर्म नित्यता, कैवल्यं मोक्षश्च स्यात् ।

कारकांश कुण्डली विचार :

आत्माकारके यस्मिन्नवांशे स्थितः स्यात् तं भावं लग्नरूपेण संस्थाप्य शेषान् ग्रहान् स्व स्व नवांशानुसारं तद् तद् भावेषु संस्थापयेत्तदैव कारकांश कुण्डली चक्रम् भवति । तदधिकृत्य फलादेशप्रकारोऽपि पराशरेण सविस्तरं वर्णितम् । जैमिनीय सूत्रेऽपि सविस्तरं तस्य चर्चा दृश्यते ।

कारकांशे मेषांशे मूषक मार्जारादिक भयं, वृषांशे चतुष्पाद भयं, मिथुनांशे कण्ड्वादि व्याधियोगः, कर्कांशे जलाद् दुःखं भयंच सिंहांशे शुनकादिभयं कन्यांशे कण्डुरोग दुःखमग्नि दोषेण दुःखंच, तुलांशे व्यापारी, क्रय विक्रय कर्ता वृश्चिकांशे सर्पादिभयं, मातुः, स्तन पीड़ा च, धन्वंशे वाहनादुच्चयेश्च पतनं मकरांशे जलचरादि शंखमुक्ता प्रवाल मत्स्यखेचरादिभ्यो लाभः कुम्भांशे तड़ागादिकर्तृत्वं, धर्मत्वं, कण्डुरोगादिकंच मीनांशे सायुज्य मुक्ति लाभो क्रमाद् भवतीति ज्ञेयम् ।

आत्माकारके लग्ने च शुभग्रह नवांशे धनवान भवति । शुभांश केन्द्रेषु राजयोगः

कारके लग्ने च शुभांशे स्वोच्चस्थे शुभग्रहे च पाप दृष्टि शून्ये सति भोगयोग: । मिश्रे मिश्र फलं वैपरीत्ये वैपरीत्यमिति । अर्थादशुभे नरकादि योग: इति भाव:॥

तत्र खौ राजकार्यपर:, पूर्णेन्दु शुक्रयोर्भोगी विद्या जीवी च, धातुवादी कौन्तायुधो वह्निजीवी च भौमे, वाणिज्यास्तन्तु वाया: शिल्पिनो व्यवहारविदश्च जीवे राजकीया: कामिन: शतेन्द्रियाश्च शुक्रे, प्रसिद्ध कर्माजीव: शनौ, धानुष्काश्चौराश्च जांगुलिका लोह यन्त्रिणश्च राहौ, गज व्यवहारिणश्चौरात्र केतौ । २२

कारकांशे सूर्ये राजकार्य तत्पर:, पूर्णचन्द्रे शुक्र दृष्टे च सति भोगवान् विद्वान्, बलवति, भौमे रसवादी कुन्ता युधी वह्निजीवी च, बुधे शिल्पी, व्यवहारी, व्यापारी च, गुरौ सर्वशास्त्र वेत्ता जगद्विख्यात: कर्मनिष्ठश्च, शुक्रे राजमानी शतायु: सदिन्द्रियश्च शनौ राजपूजितो महत्कर्मकृच्च राहौ धनुर्धरो, जांगल्य लोह यन्त्रादि कारकश्चौर संगमी च, केतौ गजादीनां व्यवहारकर्ता चौरश्च क्रमाज्जातको भवति ।

कारकांशे रवि राहु योगे सर्पभयं भवति । रवि राहुभ्यां सर्पं निश्चम् । २३ शुभ दृष्टौ भयाभाव: । पाप दृष्टौ च सर्पात् मरणमिति । यदि कारकांशे रवि राहु शुभ षड्वर्गगौ तदा विषवैद्यो भवति । भौम दृष्टि युते सति रवि राहु योगे न्यग्रह दृष्टि शून्ये सति स्वगृह पर दाहको भवति । बुध दृष्टौ चाग्निदाहको न भवति । पापग्रह युते गुरु दृष्टे च सति समीपगृह दाहको भवति । गुलिक युते पूर्णेन्दु दृष्टे सति कारकांशे चौरापहृतधनो वा स्वयं चौरो भवति । अन्यग्रह दृष्टौ बुध दृष्टौ वा सगुलिके कारकांशे ण्ड वृद्धि योग: पापग्रह दृष्टे केतुयुते कारकांशे कर्णच्छिदस्य कर्णरोगस्य वा योग: शुक्रदृष्टे च केतुयुते कारकांशे क्रिया कर्म समन्वय योग: । शनि बुध दृष्टे च बलवीर्यं रहितो भवति । बुध शुक्र दृष्टे च दासी पुत्रो जायते । अन्यग्रह दृष्टौ शनि दृष्टि शून्ये सति सत्याचार रहितो भवति । शुक्र सूर्य दृष्टे च राज प्रेष्यो भवति ।

## कारकांशाद् द्वादशभावानां फल निरूपणम् :

कारकांशाद् द्वितीये शुक्रमंगल योगे परदार गामी भवति । शुक्र मंगल दृष्टे सति मरणान्त परस्त्री रतयोग: । 'तत्र भृगारक वर्गे पारदारिक:, दृग्योगाभ्यामधिकाभ्यामरणम् केतु ना प्रतिबन्ध:, गुरुणा स्त्रैण:, राहुणार्थ निवृत्ति: ।'[२४]

केतौ सति परस्त्रीरत योगा भाव: । गुरौ सति स्त्रैण: । राहौ सति स्त्रीनिमित्तेन धनव्यय: ।

कारकांशाद् नवमे शुभग्रहयुते सत्यवादी गुरुभक्त: स्वधर्म निरतश्च पापग्रह युते वाल्ये धर्मरतस्ततश्च मिथ्यावादी भवति ।

कारकांशात् तृतीये पापग्रहे शूरो, प्रतापीच भवति, शुभग्रहे कातरो भवति । चतुर्थे चन्द्र शुक्रयुते दृष्टे वा सुन्दर गृहयुतो वा भवति । स्वोच्चस्थे ग्रहे प्रासादवान भवति । शनि राहु युते दृष्टे वा शिलागृहं, मंगल केतुशनि दृष्टे चैष्टिकं गृहं, गुरु युते चाप्यैष्टिकं कराा वेष्टित संयुक्तं वा गृहं भवति ।[२५] कारकांशे गुरुचन्द्र युते सप्तमे सुन्दरी पति भक्ति परायणा च भार्या भवति । राहुयोगे विधवा शनियोगे वयोधिक्या रोगिणी तपस्विनी च, भौमयोगे विकलांगी, कान्ताधलदाणा, रवियोगे स्वकुले गुप्ता पर गृहासक्ता, बुधे कलावती शुक्रे कलाभिज्ञा भवतीति । वृहत्पाराशर्याम् काशी संस्करणे विह्वलेतिस्थाने विधवा पाठ:, विधवा पाठमेवोचितं जैमिनीय सूत्रेऽपि विधवाया: एवोल्लेख: -

'लाभे चन्द्र गुरुभ्यां सुन्दरी राहुणा विधवा, शनिना वयोधिका रोगिणी तपस्विनी वा, कुजेन विकलांगी, रविणा स्वकुले गुप्ता च, बुधेन कलावती' ।[२६]

कारकांशात् तृतीय षष्ठयोः पापे कर्षकः कृषिकर्ता भवति, नवमे बृहस्पतौ विशेषेण कृषिकर्ता भवति ।

कारकांशाद् द्वादशभावो मोक्षादिकस्य स्थानमतो त्र तदधिकृत्यैव वर्णनम् ।
